

८०

पूर्णाङ्क

संशोधन-मण्डल

का. मे. अ. द. नं. १५५/२४६

तदिह न गुणदोषौ योजनीयावलीकौ
कथमपि महता यत् संस्कृतोऽयं श्रमेण ।

— बापूदेव शास्त्री

[[धेरै निहिनेल नरी यो तयार गरिएको छ । यस कारण यहां झूटो गुण अथवा दोष नलाइदिनुहोला ।]

पूर्णिमा

(इतिहास–प्रधान त्रैमासिक पत्रिका)

२० वर्ष

४ अङ्क

सम्पादक–

महेशराज पन्त

दिनेशराज पन्त

प्रकाशक–

देवीप्रसाद भण्डारी

(संशोधन–मण्डलद्वारा)

यस अङ्कको मूल्य रु. ३०/–

विषय-सूची

हाम्रा प्रकाशित कृति

संशोधन-मण्डलतर्फबाट

१. पूर्णिमा १ देखि ८० अङ्कसम्म ७९६।५०
२. अभिलेख-संग्रह १ देखि १२ भागसम्म ७।५०
३. इतिहास-संशोधन ५०।-
४. सावधान-पत्र २५।-
५. विद्या-रक्षा २०।-
६. व्याकरण-संशोधन ३।५०
७. पञ्चाङ्ग-संशोधन १५।-
८. बुद्धिविनोदप्रश्नावली र त्यसको उत्तर २।-
९. रत्नदीप २।५०
१०. वृत्तशतक ३।-
११. नेपालसंवत्‌को राष्ट्रिय मान्यताको अनौचित्य ५।-
१२. श्री ३ महाराज पद्मशमशेरका कुरा १२।-

नेपाल राजकीय-प्रज्ञाप्रतिष्ठानतर्फबाट

१. पण्डित गोपाल पाँडे र उनको घनमूल ल्याउने रीति १६।५०
२. प्राचीन र नवीन गणितको तुलना १५।-
३. त्रिकोणमिति (ज्योत्पत्ति) २५।२५
४. श्री ५ पृथ्वीनारायण शाहको उपदेशको संस्कृत तथा नेपाली पद्यमयी व्याख्या २५।४०
५. लिच्छविसंवत्‌को निर्णय १००।-
६. हिन्दू सिद्धान्तज्यौतिष र ग्रीक सिद्धान्तज्यौतिषको तुलना २९।-
७. रत्नदीप (पहिलो भाग) १०५।-

अरू प्रकाशनतर्फबाट

१. लिच्छविकालमा चलेका संवत् १२।-
२. गोरखाको इतिहास (१-३ भाग) ३००।-
३. अन् स्यान्स्क्रिट् एड्युकेशन् ३५।-
४. इनेप्ट् स्पेसइमिन् ? २०।-
५. ह्वट् डिड् अंशुवर्मन् राइट् ? ४०।-
६. पशुपतिनाथको दर्शन स्पर्शन पूजनसम्बन्धमा समीक्षा ८०।-

शुल्बसूत्रानुगत रेखागणित

विद्याको पहिलो विकासमहिमा बुझ्ने कुनै कामना
विद्याको स्थिरता रहन्छ कसरी भन्ने कुनै तर्कना ।
पुर्खाका गुणदोषको विषयमा बुझ्ने कुनै प्रेरणा
तिम्रो भित्र छ ता सखे ! बुझ तिमी तो वैदिकी धारणा ।।

रचयिता
नयराज पन्त

समर्पण !

मेरो मनमा रेखागणितविषयको ज्ञान पारिदिने
मेरा गुरु पण्डित श्रीहेमनाथ भट्टको स्मृतिमा
यो ग्रन्थ सादर समर्पण गर्दछु ।

वि. सं. २०४७।१२।२६
मङ्गलबार

—नयराज पन्त

प्रस्तावना

वि. सं. १९८७ मा आफ्नो १७ वर्षको उमेरमा मैले रानीपोखरी संस्कृतपाठशालामा श्रीगुरु पण्डित हेमनाथ भट्टसँग दुर्गाप्रसाद द्विवेदीले बनाएको ४ अध्याय रेखागणित पढेको हुँ। भट्ट गुरुलाई प्रतिज्ञाका गद्यवाक्य सबै कण्ठस्थ जस्तै थिए। उहाँ ती वाक्य लय हालेर पढाउनुहुन्थ्यो। वि. सं. १९८९ मा आफ्नो १९ वर्षको उमेरमा मैले काशिक–राजकीय–संस्कृतपाठशालामा श्रीगुरु पण्डित पद्माकर द्विवेदीसँग रेखागणितको एघारौँ अध्याय पढेको हुँ। गोलमा घटाई देखाएको हुनाले सो अध्याय पढ्दा केही गोलपरिभाषा पनि बुझेँ। रेखागणितको छैटौँ अध्यायचाहिँ चन्द्रशेखर झाले बनाएको पद्यात्मक पुस्तकबाट आफैँ पढेको हुँ।

वि. सं. १९९० मा सुधाकर द्विवेदीको **वास्तवचन्द्रशृङ्गोन्नतिसाधन** पढ्दै थिएँ। त्यस पुस्तकको गङ्गाधर मिश्रको टीकामा रहेका भुजकोटिज्या र कोटिकोटिज्याको घात त्रिज्या र कर्णकोटिज्याको घातले बराबर हुन्छ* भन्ने जस्ता वाक्यहरूको अर्थ मैले केही पनि बुझिनँ। यस विषयमा पद्माकर गुरुले लामो व्याख्या गरिदिनुभयो, तर पनि मैले केही बुझिनँ। मैले गुरुलाई आफूले बुझ्न नसकेको कुरा भनेँ पनि। उहाँले "यिनलाई राम्ररी बुझाइदेऊ" भनी दुलार झालाई अह्राउनुभयो। उनले प्रयत्नपूर्वक सम्झाउँदा पनि मेरो मनमा सो कुरा पटक्क चढेन र उनलाई पनि आफूले केही बुझ्न नसकेको कुरा खुलस्त भनेँ। दुलार झाले "यस्तो कुरा व्याख्या गरेर मात्र बुझिँदैन, ज्याक्षेत्र बाँधी बाँधी बुझ्न कोशिश गर्नुपर्छ, तपाईँ मेरो डेरामा आउनुहोस्, बुझाउने जिम्मा मेरो भयो" भने। मैले दुलार झासँग उनको ठेगाना सोध्दा उनले "तपाईँकै खपरा (नेपाली खपरा) मा छ" भने। यसै दिन उनले मलाई आफ्नो डेरा देखाउन लगे। त्यसपछि केही दिन म दुलार झाको डेरामा धाएँ। उनले पनि गोलमा भएका ज्याक्षेत्रहरू देखाई देखाई मैले नबुझेका कुरा २–४ दिन लगाई राम्ररी बुझाइदिए। त्यही क्रममा रेखागणितको ११ अध्यायको एघारौँ प्रतिज्ञा मैले राम्ररी बुझेँ। मैले त्यसरी बुझेको ज्याक्षेत्र **संक्षिप्त गोलविमर्श तथा हिन्दू गणितको उत्कर्ष**मा परेको छ।**

वि. सं. १९९२ मा श्री ३ जुद्धले कोटिहोम लाएका थिए। महीना त अहिले मैले बिर्सें, तर तिनताका म काठमाडौँमै थिएँ। कोटिहोमको मण्डप बनाउने र पूर्णाहुति गर्ने विषयमा परामर्श लिन गुरुज्यू हेमराज शर्माले मेरा मातामह पण्डित भुवननाथ पाँडेलाई पनि बोलाएका थिए। "बैठकमा सोमनाथ सिग्देल, पञ्जाबी मास्टर (गोकुलचन्द्र मलहोत्रा) हरू पनि थिए, सो कुरामा मैले राम्रो सल्लाह दिन सकिनँ, गुरुज्यूलाई शुल्बसूत्र पनि अलिअलि आउँछ, सोमनाथ पनि केही कुरा गर्छन्, पञ्जाबी मास्टर पनि एक दुइ कुरा झिक्छन्, आजको बैठकमा केही पनि टुङ्गो लाग्न सकेन" भनी मातामहले मलाई भन्नुभएको थियो। पछि कुराको टुङ्गो कसरी लाग्यो मैले थाहा पाइनँ।

---

* **अत्र 'भुजकोटिज्या–कोटिकोटिज्याघात–स्त्रिज्याकर्णकोटिज्याघातसमो भवती'ति युक्त्या कर्णज्ञानमतीव सुगमम्।**

(वि. सं. १९७९ मा प्रयागबाट प्रकाशित गङ्गाधर मिश्रको टीकासहितको सुधाकर द्विवेदीको **वास्तवचन्द्रशृङ्गोन्नतिसाधनम्**को १२ पृष्ठ।)

** वि. सं. २०२४ मा काठमाडौँबाट त्रिभुवन–विश्वविद्यालयद्वारा प्रकाशित मङ्गलदास प्रधानाङ्ग, साम्बराज आचार्य, मेघनाथ आचार्यको **संक्षिप्त गोलविमर्श तथा हिन्दू गणितको उत्कर्ष**को ४१ पृष्ठ।

मातामहबाट शुल्बसूत्रको नाउँ सुनेपछि मैले शुल्बसूत्र पढ्न शुरु गरें । त्यस वेला हामीकहाँ शुल्बसूत्रको छापा पुस्तक थिएन, गङ्गाधरको शुल्बभाष्य तथा रामचन्द्रको शुल्बवार्तिक यी दुइ हस्तलिखित पुस्तक मात्र थिए ।

मैले वि. सं. १९८४ मा मातामहसँग मुहूर्तमार्तण्ड पढेको थिएँ । मुहूर्तमार्तण्डमा अभीष्ट रेखामा वर्गक्षेत्र वा आयतक्षेत्र बनाउनको लागि यस्तो विधि बताइएको छ—

द्विघ्नायाममितं द्विपाशमजरत्सूत्रं विधायाऽङ्कयेत्
त्र्यायामाङ्घ्रिमिते च विस्तृतिदलेऽन्तात् कर्षकोणाभिधौ ।
पाशौ क्षेत्रविरामशङ्कुनिहितौ कृत्वाऽऽद्यमाकर्षयेत्
कोणे शङ्कुरितीतरो विनिमयाद्व्रज्ज्वन्तयोश्चाऽपरौ ।।१४।।

(मुहूर्तमार्तण्ड गृहप्रकरण)

[जति लमाइको वर्गक्षेत्र वा आयतक्षेत्र बनाउनु छ, त्यसको दोबर नापो भएको, बलियो, दुवै छेउमा पाश (किलो छिर्ने सुर्किने गाँठो) भएको डोरी लिनू । लमाइलाई ४ भाग लगाई डोरीको एक छेउदेखि गन्दै तेस्रो भागको अन्त्यमा एउटा चिनु लाउनू, त्यसको नाउँ कर्ष राख्नू । डोरीको त्यही छेउदेखि चौडाइको आधा नापोमा चिनु लाउनू, त्यसको नाउँ कोण राख्नू । अभीष्ट क्षेत्र बनाउन त्यसको लमाइबराबरको दूरीमा ठोकिएका दुइटा शङ्कु (किला) मा डोरीका पाश छिराउनू । कर्षमा समाती डोरी तान्नू । यसरी तनक्क तन्काउँदा जहाँ कोण पर्छ, त्यहाँ शङ्कु ठोक्नू । फेरि त्यस डोरीलाई अर्को दिशातिर अघि कैं कर्षमै समाती तनक्क तान्नू र त्यतापट्टि पनि कोण परेको ठाउँमा शङ्कु ठोक्नू । त्यसपछि पहिलो शङ्कुमा रहेको पाशलाई दोस्रो शङ्कुमा र दोस्रो शङ्कुमा रहेको पाशलाई पहिलो शङ्कुमा सार्नू र मधिकै क्रिया दोहोऱ्याउनू । यसरी कोणकोणमा ठोकिएका चारवटा शङ्कुभित्र अभीष्ट क्षेत्र बन्छ ।]

मेरा मातामहले मलाई मुहूर्तमार्तण्डको उपर्युक्त विधिअनुसार क्षेत्र बनाउन सिकाइदिनुभएको थियो, मैले पनि सो विधि राम्ररी बुझेको थिएँ ।

भारतमा मुसलमानी राज्य आएपछि मात्र रेखागणितको प्रचार भएको हो ।* भारतमा अङ्ग्रेजी राज्य आएपछि मात्र व्यवस्थित रूपमा रेखागणित पढाउन थालिएको हो । त्यो पनि अहिलेभन्दा १५० वर्ष जति अघाडि मात्र पण्डित बापूदेव शास्त्रीद्वारा शुरु गरिएको हो ।** त्यसभन्दा अगाडि संस्कृत पढ्नेहरू रेखागणित पढ्दैनथे । "उहिले रेखागणित पढ्दैनथे, सिद्धान्तज्यौतिष पढ्दा बीचबीचमा पढिने परिभाषा नै रेखागणित हो" भनी भट्ट गुरु वारंवार भनिरहनुहुन्थ्यो । मेरा मातामहले पनि रेखागणित पढ्नुभएको थिएन । उहाँ सूर्यसिद्धान्तअनुसार पञ्चाङ्ग गणना गर्न सक्नुहुन्थ्यो ।

शुल्बसूत्र पढ्दै जाँदा मैले त्यसको प्रथम कण्डिकामा तलका सूत्र देखें ।

---

* वि. सं. २०४६ मा काठमाडौंबाट नेपाल राजकीय प्रज्ञा-प्रतिष्ठानद्वारा प्रकाशित नयराज पन्त (सहायक- देवीप्रसाद भण्डारी, रुक्मनाथ पौडेल) को हिन्दू सिद्धान्तज्यौतिष र ग्रीक सिद्धान्तज्यौतिषको तुलना पहिलो भागका ८२-८३ पृष्ठ ।

** वि. सं. १९९० मा काशीबाट प्रकाशित पद्माकर द्विवेदीद्वारा सम्पादित सुधाकर द्विवेदीको गणकतरङ्गिणी-का १२६-१२९ पृष्ठ ।

श्रोण्यंसनिरञ्छनसङ्ख्यासमासभङ्गेषु लक्षणानि ।।५।।

[श्रोणी (क्षेत्रका* पश्चिमतिरका दुइ कुना), अंस (क्षेत्रका पूर्वतिरका दुइ कुना), निरञ्छन (माथि बताइएको कर्ण), सङ्ख्यासमास (क्षेत्रका भुजको योग), सङ्ख्याभङ्ग (क्षेत्रका भुजको अन्तर) हरूमा चिनु लाउनू ।]

प्राच्यन्तयोः शङ्कू निहन्ति ।।६।।

[पूर्व र पश्चिममा दुइटा शङ्कु ठोक्नू ।]

श्रोण्योरंसयोश्च ।।७।।

[श्रोणी र अंसमा पनि शङ्कु ठोक्नू ।]

शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वां दिशं हरन्ति ।।८।।

[पूर्व र पश्चिमका दुइटा शङ्कुमा डोरीका पाश छिराउनू र निरञ्छनमा समातेर सो डोरीलाई दक्षिणपूर्व (आग्नेय) दिशातिर तान्नू ।]

एवमुत्तरतः ।।९।।

[उत्तरपूर्व (ईशान) दिशातिर पनि यस्तै गर्नू ।]

विपर्यस्येतरतः ।।१०।।

[पूर्वशङ्कुको पाशलाई पश्चिमशङ्कुमा र पश्चिमशङ्कुको पाशलाई पूर्वशङ्कुमा छिराएर माथिकै क्रिया दोहोऱ्याउनू ।]

स समाधिः सर्वत्र ।।११।।

[सबै ठाउँको विधि यही हो ।]

प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनम् ।।१२।।

[प्रमाण (जति नापोको वर्गक्षेत्र वा आयतक्षेत्र बनाउने हो सो नापोको डोरी) लाई दोबर पार्नू । प्रमाणलाई ४ भाग लाउनू, त्यसमा चौथो भाग शुरु हुने चिह्न निरञ्छन कहिन्छ ।]

अक्ष्णया तिर्यङ्मानीशेषः ।।१३।।

[यहाँ अक्ष्णयारज्जु (कर्ण) र तिर्यङ्मानी (कोटि) बन्छन् ।]

प्रमाणार्द्धं समचतुरस्रस्य शङ्कुः ।।१६।।

[समचतुरस्र (वर्गक्षेत्र) बनाउँदा प्रमाणको आधामा शङ्कु ठोक्नू ।]

---

* यहाँ अभीष्ट वर्गक्षेत्र वा आयतक्षेत्र पूर्वाभिमुख रहेको छ भन्ने मानिएको छ ।

शास्त्रवदर्द्धं दीर्घचतुरस्रस्य ॥१७॥

[दीर्घचतुरस्र (आयतक्षेत्र) बनाउँदा शास्त्रमा बताएअनुसारको चौडाइको आधामा पारी शङ्कु ठोक्नू ।]

मैले मातामहसंग पढेका मुहूर्तमार्तण्डमा बताइएको विधि र शुल्बसूत्रमा दिइएको माथिको विधि एउटै रहेछ। त्यसैले शुल्बसूत्रको यो भागको अर्थ मैले छलंङ्ग बुझें ।

हामीहरूको विवाह व्रतबन्धमा जग्गे बनाउँदा चार सुरमा एकएकओटा र ठीक पूर्वमा एउटा गरी जम्मा पाँचवटा लिङ्गा गाडिन्छन् । यसको अर्थ शुल्बसूत्र पढ्न थालेपछि मात्र मैले बुझें । यो कुरा मैले आफ्ना मातामहलाई पनि सुनाएं । उहाँले मेरो कुरा सुनेपछि "सबै कुरा राम्ररी अर्थ सक्छस् भने हिंड् गुरुज्यूकहाँ लगिदिन्छु" भनी मलाई भन्नुभयो । मैले त्यो आँट गर्न सकिनँ, किनकि म सम्पूर्ण शुल्बसूत्रको अर्थ गर्न सक्तिनथें ।

यिनैताका मैले तलका श्लोक बनाएं—

शालायाम् अधुना छात्रैः पठ्यमाना सुयुक्तियुक् ।
स्फुटं क्षेत्रमितिर् ग्रीकैर् उपज्ञातेति धीमताम् ॥
भारतीया क्षेत्रमितिरासीत् पूर्वं किमाकृतिः ।
किं च मूलं कथं तस्या विकास इति निर्णये ॥
कात्यायनादिमुनिभिः प्रणीतं शुल्बसूत्रकम् ।
शरणं तत्त्वमीप्सूनां जिज्ञासूनाम् इति स्फुटम् ॥

(वि. सं. १९९२ वैशाख १० गते सोमवार)

[आजभोलि पाठशालामा पढिने सोपपत्तिक रेखागणितको आविष्कार ग्रीकहरूले गरेका हुन् भन्ने स्पष्ट छ । हिन्दूहरूको रेखागणित कस्तो थियो, त्यसको मूल के थियो, त्यसको विकास कसरी भयो भन्ने कुरा बुझ्न खोज्ने जिज्ञासुहरूले कात्यायन आदि मुनिहरूले बनाएको शुल्बसूत्र पढ्नुपर्छ ।]

त्यसपछि मैले काशीमा छँदा सरल व्याख्यासहितको शुल्बसूत्र* र कर्कभाष्य तथा महीधरवृत्तिसहितको शुल्बसूत्र** यी दुइटा छापा पुस्तक किनें । यिनै पुराना र नयाँ पुस्तकका आधारमा शुल्बसूत्र पढ्ने र व्याख्या गर्ने काममा म लागें । परन्तु शुल्बसूत्र पढ्ने विद्यार्थीचाहिँ कोही भएनन् । वाल्मीकि पौडल (हाल वाल्मीकि विद्यापीठका प्राध्यापक) रानीपोखरी–संस्कृतपाठशालामा पढ्थे । सोमनाथ गुरुले "यिनलाई शुल्बसूत्र पढाइदेऊ" भनी भन्नुभएकोले मैले वाल्मीकिलाई सो ग्रन्थ पढाएँ । शुल्बसूत्र रेखागणितविषयको भएको र शङ्करमान राजवंशीले रेखागणित पढेका हुनाले शङ्करमानले वाल्मीकिलाई सघाए । मैले पढाएको भागबाट परीक्षामा एउटै प्रश्न पनि सोधिएन भनी वाल्मीकि मसँग गुनासो गर्थे । पछि ऋषिराम पोखरेल (हाल वाल्मीकि विद्यापीठका प्राध्यापक)

---

* वि. सं. १९८५ मा काशीबाट अच्युतग्रन्थमाला–कार्यालयद्वारा प्रकाशित विद्याधर शर्माद्वारा सम्पादित उनैको व्याख्यासहितको शुल्बसूत्र ।

** वि. सं. १९९३ मा काशीबाट चौखम्बा संस्कृत सीरिज अफिसद्वारा प्रकाशित गोपाल शास्त्री नेनेद्वारा सम्पादित कर्कभाष्य तथा महीधरवृत्तिसहितको कात्यायनशुल्बसूत्र ।

लाई पनि शुल्बसूत्र पढाएँ। त्यतिखेर मङ्गलदास प्रधानाङ्गले ऋषिरामलाई सघाएका थिए।*

शुल्बसूत्रको वर्गक्षेत्र बनाउने विधि सोमनाथ गुरुलाई कण्ठस्थ थियो र त्यसको लौकिक ज्ञान पनि उहाँमा थियो।** विद्यार्थीहरूलाई रेखागणित पढाउँदा शुल्बसूत्रअनुसार पढाउन पाए उनीहरूमा लौकिक ज्ञान बढ्ता हुने थियो भन्ने भाव मेरो मनमा जमेर रहेको छ। यसैले एक दिन यस विषयका कुरा मैले सोमनाथ गुरुसँग गरें। "हुन त हो, तर त्यस किसिमको पढाइले वर्तमान परीक्षाप्रणालीसँग मेल खाँदैन" भनी उहाँले मेरो कुरामा कुनै रुचि देखाउनुभएन। एक दिन बाबुराम आचार्य (पछि ऐतिहासिक शिरोमणि) सँग पनि यस्ता कुरा गरेका थिएँ। उनले 'कोठामा बसेर शुल्बसूत्र पढिँदैन" भन्ने जवाफ दिए।

गुरुज्यू हेमराज शर्मा विशेष शास्त्रचर्चा गरिरहने व्यक्ति थिए। साहित्यका अलङ्कारहरूको विषयमा उनको विशेष रुचि थियो। "पुस्तकमा दिइएको एउटा उदाहरणलाई मात्र अभ्यास गरेर पुग्दैन, अन्तअन्तका उदाहरण पनि अभ्यास गर्ने गर्नुपर्छ" भन्ने कुरा उनी बारंबार सुनाइरहन्थे। शास्त्रचर्चाकै प्रसङ्गमा एक दिन मैले उनीसँग पनि रेखागणित पढ्ने विद्यार्थीहरूलाई शुल्बसूत्र पनि पढाउन सके उनीहरू आफ्नो क्षेत्रमा बढी कर्मण्य हुने थिए भन्ने कुरा गरें। उनले "शुल्बसूत्र कसले पढाउँछ नि ?" भनी सोधे। मैले "म पढाइदिन्छु" भनें। एक पटक यस्तै शास्त्रचर्चा चल्दा अष्टाध्यायी कण्ठस्थ पार्ने विषयमा हामीबीच यस्तो चर्चा भएथ्यो—

हेमराज– अष्टाध्यायी पढेर केही काम लाग्दैन।
म– काम लाग्छ। कौमुदीहरू त घोक्ने ग्रन्थ नै होइनन्।
हेमराज– ल त उसो भए तिमी अष्टाध्यायी पढाऊ, म पढ्छु।
म– वृद्धिरादैच्। १।१।१।
हेमराज– यो त सजिलै छ, बुझिन्छ।
म– अदेङ् गुणः।१।१।२
हेमराज– बुझिन्छ।
म– इको गुणवृद्धी १।१।३
हेमराज– यो पनि बुझिन्छ।
म– न धातुलोप आर्धधातुके १।१।४
हेमराज– ल बुझाऊ त, यो सूत्रको कसरी अर्थ गर्छौ ?
म– पहिले अष्टाध्यायी आद्योपान्त कण्ठस्थ हुनुपर्छ अनि यो सूत्रको अर्थ लाग्छ। यही एउटा सूत्रबाट मात्र यो सूत्रको अर्थ बुझिन्न।

---

* वि. सं. २०२४ मा प्रकाशित पूर्णिमा १३ अङ्कमा छापिएको नयराज पन्तको शुल्बसूत्र (वैदिक रेखागणित) को एक झलक भन्ने निबन्ध, सो अङ्कका ५६–५७ पृष्ठ।

** शुल्बसूत्रको परिशिष्टमा दिएको तलको श्लोक सोमनाथ गुरु बारंबार सुनाइरहनुहुन्थ्यो।

यावत्प्रमाणा रज्जुः स्यात् तावानेवागमो भवेत्।
आगमार्द्धे भवेच्छङ्कुस्तदर्द्धे च निरञ्छनम् ॥३३॥

[यसको अर्थ र माथि उद्धृत मुहूर्तमार्तण्डको श्लोकको अर्थ उही हो।]

यति वार्तालाप भएपछि गुरुज्यूबाट केही जवाफ आएको थिएन। शुल्वसूत्रको चर्चा गर्दाचाहिँ गुरुज्यूबाट यस्तो कुनै प्रश्न नै भएन। यसै प्रसङ्गमा गुरुज्यूले बारंबार भनिरहने गरेको एउटा घटना सुनाउँछु। सो यस प्रकारको छ—

श्री ३ वीरशमशेरको निगाहबाट पण्डित शिरोमणि आचार्यले काशीमा सोमयागहरू गरेका थिए। सो यज्ञमा "राम्रो हेरविचार गर्नू" भनी श्री ३ वीरशमशेरबाट मलाई आज्ञा भएको थियो। त्यस कारण त्यस यज्ञमा म गएको थिएँ। काशीका पण्डितसँग उहीँ आफ्नै घरमा यज्ञविषयका ग्रन्थहरू पढ्न थालेको थिएँ। एक दिन हामी पढ्दै थियौँ, हाम्रो घरबाहिर एक जना फुत्रेझुत्रे मान्छे निकै बेर ठिङ्ग उभिइरहे। मैले तिनलाई माग्ने भन्ने सम्झेर भिक्षा दिई बिदा गर्न खोज्दा "म माग्न भनेर आएको होइन, एक छिन भित्रै बस्न पाउँछु कि!" भनी तिनले भने। हामी पढ्न थाल्यौँ, उनी हाम्रा छेउँमा बसे। मेरा गुरु पाना हेरी हेरी मलाई जुन ग्रन्थ पढाउँदै थिए, सो ग्रन्थ यी आगन्तुकलाई कण्ठस्थ रहेछ। यिनले प्रत्येक कुराका प्रमाणहरू यहाँ यहाँ छन् भनी हामीले पढ्न लागेका ग्रन्थ खटाखट भनिदिए। यी आगन्तुक प्रकाशावदानी नाउँ गरेका दक्षिण भारतका विद्वान् रहेछन्। मैले प्रकाशावदानीसँग यज्ञसँग सम्बद्ध धेरै पुस्तकहरू र शुल्बसूत्र पनि परिश्रमपूर्वक पढेँ।

शिरोमणिका यज्ञका मुख्य निर्देशक गङ्गाधर शास्त्री थिए। यति हात लमाइ यति हात चौडाइ भएको यज्ञमण्डप बनाउँदा यतियति प्रमाणका यतिवटा इष्टिका (विशेष प्रकारका इँट) हाल्नुपर्छ भनी यज्ञमण्डप बनाउने विधिमा लेखिएको हुन्छ। शिरोमणिको यज्ञमण्डप बनाउँदा कहिले यता नमिल्ने कहिले उता नमिल्ने भई गङ्गाधर शास्त्रीलाई आच्छुआच्छु पऱ्यो। यो कुरा बाहिरको पण्डित-समाजसम्म पनि पुग्यो। काशीका यजुर्वेदी ब्राह्मणहरूले "आफ्नै वेदपक्षका हामीहरूसँग सल्लाह नगरी ऋग्वेदी ब्राह्मण (गङ्गाधर शास्त्री) लाई कामको जिम्मा लगाएर शिरोमणिले अन्याय गरे" भन्ने हल्ला फिँजाएका थिए। त्यसैले "यज्ञमण्डप बनाउन लागेको ठाउँमा गएर हामीले गङ्गाधरका बेइज्जती गरिदिनुपर्छ" भन्ने मानस पनि देखिए।*

मैले प्रकाशावदानीसँग यज्ञमण्डप बनाउने विधि पढिसकेको थिएँ। यसैले म शिरोमणिका कान्छा छोरा हरिहरसँग सल्लाह गरी उनलाई पनि साथै लिई गङ्गाधरको घरमा गएँ र "यज्ञमण्डपका इष्टिकाहरू म मिलाइदिन्छु" भनेँ। "तिमी त्यसो गर्न सक्लाउ र!" भनी गङ्गाधर शङ्का गर्दै थिए, मैले खोट लाउने ठाउँ नराखीकन सबै इष्टिकाहरू मिलाइदिएँ।

सबै यज्ञ समाप्त नहुन्जेलसम्म प्रकाशावदानी काशीमै बसे। साङ्गेपछि उनी घरतिर लागे। मैले बाटो-खर्चको नाउँमा केही रुपियाँ दिन खोजेको थिएँ, तर उनी "त्यति धेरै के काम, मलाई बाटोखर्च मात्र भए पुग्छ" भनी थोरै रुपियाँ लिई गए।

गुरुज्यूबाट धेरै पटक कहिले संक्षेपमा कहिले विस्तारमा सुनेको यो घटनाको साक्ष्यको रूपमा आचार्यवंशावलीको यो पद्य पनि आउँछ—

श्रीनेपालधराधिराजगुरुषु श्रीहेमराजाभिधे-
ष्वाचान्ताखिलदर्शनेष्वधिगतश्रौतक्रियामर्मसु।
सोत्साहानिशसन्निधानसकलान् वीक्षाकृतानुग्रहे-
ष्वापुस्ते कृतवस्त्रयोऽप्यविकलाः प्राशस्त्यकोटिं पराम्॥३७५॥

---

* योचाहिँ कुरा मैले श्रीगुरु पण्डित देवीदत्त पराजुलीबाट पनि सुनेको थिएँ।

(वि. सं. १९५९ मा काशीबाट प्रभाकरी प्रेसद्वारा प्रकाशित सदाशिव दीक्षितको आचार्यवंशावलीको ६२ पृष्ठ।)

[दर्शनशास्त्र पढेका, वैदिक यज्ञक्रियाको मर्म बुझेका, नेपालका राजगुरु श्रीहेमराज शर्माले रातोदिन उत्साहपूर्वक साथ रही सबै कुराको हेरविचार गरिदिनुभएकोले तीनोटै यज्ञ निर्विघ्नपूर्वक राम्ररी सकिए।]

शुल्बसूत्रमा वर्गक्षेत्र बनाउने विधि दिइएको छ भन्ने कुरा अघि लेखियो, तर त्यहाँ सो विधिको उपपत्ति दिइएको छैन। वर्तमान कालमा प्रचलित रेखागणितको पहिलो अध्यायको ४६ प्रतिज्ञामा वर्गक्षेत्र बनाऊ भनेको छ, बनाउन विधिचाहिँ इतिकर्तव्यतामा दिइएको छ। आजभोलिको पठनपाठनमा चलेको रीतिअनुसार रेखागणित पढेकाहरू कागतमा वर्गक्षेत्र कोर्न त सक्छन्, तर तिनीहरूले लौकिक व्यवहारमा साँच्चिकै वर्गक्षेत्र बनाउने शिक्षा पाएका हुँदैनन्। यो स्पष्ट छ। शुल्बसूत्रअनुसारका वस्तूपपाद्य प्रतिज्ञा र वर्तमानकालको रेखागणितअनुसारका प्रमेयोपपाद्य प्रतिज्ञाहरू पढाउन पाए विद्यार्थीहरू कमठ होलान् भन्ने मेरो मनमा लागेकोले मैले तदनुरूप यो रेखागणित बनाएको हुँ। यो बनाएको पनि ३० वर्षभन्दा बढी समय बितिसक्यो। यसका केही प्रतिज्ञा जयतु-संस्कृतम्मा छापिएका पनि छन्।*

मैले गरेको खेस्रालाई देवीप्रसाद भण्डारी र शङ्करमान राजवंशीले साफी गरिदिएका थिए। मैले पद्य मात्र लेखेको छु। यसको पहिला अध्यायको नेपाली अनुवाद तथा इतिकर्तव्यता, उपपत्तिहरू गौतमवज्र वज्राचार्य र महेशराज पन्तले लेखेका थिए, सो काम त्यसै अड्कियो। यस कारण अब इतिकर्तव्यता, उपपत्तिहरू हाली सबै ग्रन्थ लेखिदिने मानिस पाइएला भन्ने सम्भावना कम हुँदै गएको छ। अहिले म पनि पूरा ७७ वर्ष ८ महीनाको भइसकें। यस कारण आफ्नो शेषपछि गल्लीमा फ्याँकिएका कसिङ्गरका रूपमा यी लेख नपुगून् भनी अहिले मूल मात्रै भए पनि यो शुल्बसूत्रानुगत रेखागणित पूर्णिमामा छपाउन लागेको छु।

पूर्णिमा वि. सं. २०२१ वैशाखदेखि प्रकाश हुन थालेको त्रैमासिक पत्रिका हो। यस कारण वि. सं. २०४७ चैत्रसम्म यसका १०८ अङ्क प्रकाश भइसक्नुपर्थ्यो, तर त्यसो हुन सकेन। अहिले यो ८० अङ्कको रूपमा निस्कँदै छ।

देवीप्रसाद र शङ्करमानले साफी गरेका पद्यहरूलाई अहिले रुक्मनाथ पौडेलले सारी छापाखानामा पठाउन हुने बनाइदिए। यति काम गरिदिने माथि नाउँ परेका सबैलाई यथोचित धन्यवाद छ।

— नयराज पन्त

वि. सं. २०४७ चैत्र २६ गते
मङ्गलवार

---

* वि. सं. २०१९ मा काठमाडौंबाट प्रकाशित जयतु संस्कृतम् १८ पूर्णाङ्कमा छापिएको नयराज पन्तको वैदिकमार्गा (शुल्बसूत्र)नुसारि रेखागणितम् भन्ने निबन्ध। वि. सं. २०२० मा प्रकाशित जयतु संस्कृतम् २९ पूर्णाङ्कमा छापिएको नयराज पन्तको रेखागणितस्य कश्चनांशः भन्ने निबन्ध।

पहिलो अध्याय

पहिलो प्रतिज्ञा

प्रोक्तां रेखां त्रिज्यके रेखिकायास् तस्याः प्रान्तौ केन्द्रबिन्दू प्रकल्प्य ।
वृत्ते कृत्वा वृत्तसम्पातबिन्द्वोर् ऊर्ध्वं बिन्दुं कल्पयेद् इष्टबिन्दुम् ।।
केन्द्रद्वन्द्वाद् इष्टबिन्दुं च यावत् त्रिज्याऽऽकारं सूत्रयुग्मं विदध्यात् ।
एवं तुल्यैर् दोर्भिरुत्पद्यमानं त्र्यस्रं सिध्येत् प्रोक्तरेखोपरिस्थम् ।।

दोस्रो प्रतिज्ञा

प्रोक्तां रेखां त्रिज्यकां प्रोक्तबिन्दुं केन्द्रं मत्वा मण्डलं संविदध्यात् ।
तस्मिन् वृत्ते स्युः समस्तास् त्रिभज्या निर्दिष्टाया रेखिकायाः समानाः ।।
प्रोक्ताद्, बिन्दोः प्रोक्तरेखासमानां रेखां कर्तुं रीतिरेषा बिभाति ।

तेस्रो प्रतिज्ञा

कश्चित् प्रान्तं रेखिकाया महत्याः केन्द्रं लघ्वीं रेखिकां च त्रिभज्याम् ।।
मत्वा वृत्तं साधयेत् स्याद् विभागो लघ्व्या तुल्यो रेखिकाया महत्याः ।

चौथो प्रतिज्ञा

आद्यत्र्यस्रे संस्थितं बाहुयुग्मं तद्मध्यस्थः कोणकश् च क्रमेण ।।
अन्त्यत्र्यस्रस्थेन बाहुद्वयेन कोणेनैतद्दोर्द्वयीमध्यगेन ।
तुल्यं चेत् स्यात् त्र्यस्रयुग्मस्य तस्य भूमिर् भूम्या भूमिलग्नौ च कोणौ ।।
भूमिष्ठाभ्यां कोणकाभ्यां क्रमेण तुल्यौ स्यातां ते त्रिकोणे च तुल्ये ।

पाँचौं प्रतिज्ञा

त्र्यस्रे बाहू चेद् भवेतां समानौ कोणौ तुल्यौ भूमिलग्नौ भवेताम् ।।
आधाराधो वर्धनाद् दोर्युगस्य जातौ कोणौ भूम्यधःस्थौ च तुल्यौ ।

अनुमान

त्र्यस्रक्षेत्रे बाहवश् चेत् समाः स्युः कोणाश् च स्युस् तुल्यताम् आदधानाः ।।

छैटौं प्रतिज्ञा

त्र्यस्रे कोणौ भूमिलग्नौ समानौ स्यातां चेत् स्याद् बाहुयुग्मं समानम् ।

अनुमान

त्र्यस्रे कोणाश् चेत् समाना भवेयुर् अन्योन्यस्मिन् स्युः समाना भुजाश् च ।।

सातौं प्रतिज्ञा

एकाधारे चैकपार्श्वे वसन्ती नैव स्यातां तादृशे द्वे त्रिकोणे ।
आधारैकप्रान्तसंसक्तबाह्वोर् अन्योन्यस्मिँस् तुल्यतायां स्थितायाम् ।।
आधारान्यप्रान्तसंसक्तयोश् च स्याद् अन्योन्यं यत्र बाह्वोः समत्वम् ।

आठौं प्रतिज्ञा

पूर्वे त्र्यस्रे संस्थितानां त्रयाणां दोष्णां तुल्याः सम्भवेयुः परस्मिन् ।।
त्र्यस्रे निष्ठा बाहवश् चेत् त्रयोऽपि पूर्वत्र्यस्रस्था त्रिकोणी तदानीम् ।
अन्त्ये त्र्यस्रे संवसन्त्या त्रिकोण्या तुल्या सिध्येत् तुल्यबाहुक्रमेण ।।
त्र्यस्रद्वन्द्वं तच्च निर्दिश्यमानम् अन्योन्यस्मिन् स्यात् समानप्रमाणम् ।

मत्स्य बनाउने रीति

दृष्टां रेखां त्रिज्यके रेखिकायास् तस्याः प्रान्तौ केन्द्रबिन्दू प्रकल्प्य ।।
वृत्तद्वन्द्वं साधयेद् मण्डले ते स्यातां तुल्ये गाहमाने मिथश् च ।
एवं रीत्या सिद्धयोर् वृत्तयोः स्याद् अन्तःपाती मत्स्यरूपो विभागः ।।
योगद्वन्द्वं पालिजं स्यात् तदीयं तत्रैकः स्याद् मत्स्यशीर्षाऽभिधानः ।
अन्यं प्राहुर् मत्स्यपुच्छाऽह्वयं च सूत्रं कार्यं शीर्षपुच्छाऽवगाहि ।।
सूत्रस्याऽस्य प्राज्यकार्योपयोगाद् एतज् ज्ञातुं ज्ञा एष साधयन्ति ।
एतद्रीत्या साधितं मत्स्यमेव सङ्ख्यावन्तः केचनाऽहुर् यवाख्यम् ।।

नवौं प्रतिज्ञा

रेखायुग्मे कुर्वति प्रोक्तकोणं तस्मात् कोणात् तुल्यदूरस्थितौ द्वौ ।
बिन्दू कुर्याद् एकपार्श्वेऽथ कुर्याद् एतद्बिन्दुद्वन्द्वगं सूत्रमेकम् ।।
तस्मिन् सूत्रे मत्स्यमुत्पाद्य तस्य सूत्रं कुर्याच् शीर्षपुच्छाऽवगाहि ।
एतत् सूत्रं प्रोक्तकोणाऽश्रितं सत् तुल्यौ भागौ प्रोक्तकोणस्य कुर्यात् ।।

दसौं प्रतिज्ञा

कृत्वा मत्स्यं रेखिकायां निजायां कुर्यात् सूत्रं शीर्षपुच्छाऽवगाहि ।
एतत् सूत्रं रेखिकाया निजायाः खण्डद्वन्द्वं संविदध्यात् समानम् ।।

एघारौं प्रतिज्ञा

निर्दिष्टायां रेखिकायां निविष्टात् प्रोक्ताद् बिन्दोः पार्श्वगौ तुल्यदूरौ ।
तद्रेखास्थावङ्कयित्वा च बिन्दू एतद्बिन्दुद्वन्द्वजाताऽन्तरस्थे ।।
निर्दिष्टाया रेखिकाया विभागे मत्स्यं कृत्वा तच्शिरःपुच्छगामि ।
सूत्रं कुर्याद् रेखिकायां निजायां तत्स्थात् प्रोक्ताद् बिन्दुतस् तद् हि लम्बः ।।

बाह्रौं प्रतिज्ञा

निर्दिष्टाया रेखिकाया बहिःस्थं प्रोक्तं चिह्नं केन्द्रबिन्दुं प्रकल्प्य ।
स्थानद्वन्द्वे रेखिकायां विलग्नं निर्दिष्टायां वृत्तमिष्टं विदध्यात् ।।
एतद्वृत्ताऽभ्यन्तरे वर्तमाने निर्दिष्टाया रेखिकाया विभागे ।
मत्स्यं कृत्वा तच्छिरःपुच्छगामि सूत्रं कुर्यात्, साधितं सूत्रमेतत् ।।
निर्दिष्टायां रेखिकायां बहिःस्थात् प्रोक्ताच् चिह्नाज् जायतां लम्बरूपम् ।

तेह्रौं प्रतिज्ञा

आद्याख्यायां रेखिकायां निविष्टं कञ्चिद् बिन्दुं प्रान्तवर्जं परस्याः ।।
रेखायाश् चेत् प्रान्तबिन्दुः समेयाज् जायेयातां कोणकौ योगबिन्दौ ।
इत्थं योगाज् जातयोः कोणयोस् तु प्रत्येकं हि स्यात् समास्नाऽभिधानम् ।।
वा तत्कोणद्वन्द्वसम्पन्नयोगः कोणद्वय्याः स्यात् समायाः समानः ।

चौधौं प्रतिज्ञा

रेखाप्रान्ते पार्श्वयुग्मात् तदीयाद् आगच्छन्त्यो रेखयोर् मेलनेन ।।
जातौ कोणौ चेत् समौ वा तदीयो योगोऽस्नाभ्यां स्यात् समाभ्यां समानः ।
पार्श्वद्वन्द्वाद् आगते रेखिके ते जायेयाताम् एकरेखास्वरूपे ।।

पन्ध्रौं प्रतिज्ञा

रेखायुग्मं सम्पतेद् यत्र बिन्दौ चत्वारः स्युस् तत्र कोणाः प्रजाताः ।
द्वौ द्वौ कोणौ संमुखीनौ चतुर्षु तेषु स्यातां तुल्यताम् आददानौ ।।

पादको परिभाषा

केन्द्राद् इष्टाद् इष्टया त्रिज्यया च वृत्तं कृत्वा व्यासरेखां च कुर्यात् ।
तस्मिन् व्यासे प्राक्पराख्ये विदध्याल् लम्बं व्यासं याम्यसौम्याख्यमन्यम् ।।
इष्टा पालिर् व्यासयुग्मेन तेन तुल्यैः खण्डैर् अङ्क्यते स्वैश् चतुर्भिः ।
एते खण्डाः पादसंज्ञां दधाना गण्यन्ते प्राक्चिह्नतोऽसव्यरीत्या ।।

राश्यादिको परिभाषा

इष्टं वृत्तं बाहुचन्द्र १२ प्रमाणैस् तुल्यैर् भागैर् अङ्कनीयं च नेम्याम् ।
एते भागा राशिसंज्ञां वहन्ति पादे पादे राशयो वह्नयः ३ स्युः ।।
राशीनां स्याद् द्वादशानां १२ भचक्रम् अंशाः खण्डा राशिजास् त्रिंश ३० दुक्ताः ।
षष्टिर् ६० भागा अंशजाः स्युः कलाख्यास् तत्षष्ट्यं ६० शाः स्युर् विपूर्वाः कलाख्याः ।।

चापको परिभाषा

इष्टैर् अंशैर् अङ्कितं नेमिखण्डम् इष्टं चापं कोविदा आमनन्ति ।

कोणको नापो

चापप्रान्तद्वन्द्वमाप्ते त्रिभज्ये ये स्यातां तद्योगजः केन्द्रसंस्थः ।।
कोणो यः स्यात् तस्य कोणस्य मानं ज्ञेयं चापस्थेन भागादिकेन ।

समकोणको नापो

चक्रे नेम्यां स्युः खषड्वह्नयों ३६० शाश्, चत्वारः स्युः केन्द्रभाजः समास्राः ।।
तत् प्रत्येकं कोणकेंऽशाः समाख्ये सम्पद्येरन् व्योमरन्ध्र ९० प्रमाणाः ।

सोह्रौं प्रतिज्ञा

त्र्यस्रे बाहोः कस्यचिद् वर्धनेन बाह्ये भागे जायमानस् तु कोणः ।।
अन्तःस्थाभ्यां स्वाऽङ्गसक्ताऽस्रवर्जं प्रत्येकं स्यात् कोणकाभ्यां महीयान् ।

सत्रौं प्रतिज्ञा

अन्तस्त्र्यस्रं जातयोः कोणयोस् तु योगोऽस्राभ्यां स्यात् समाभ्यां लघीयान् ।।

अठारौं प्रतिज्ञा

त्र्यस्रे कोणो दीर्घदोःसंमुखीनः स्थूलः कोणाद् ह्रस्वदोःसंमुखात् स्यात् ।

उन्नाइसौं प्रतिज्ञा

त्र्यस्रे बाहोः स्वल्पकोणाऽग्रसंस्थात् स्याद् दोर् दीर्घः स्थूलकोणाऽग्रवर्ती ।।

अतिरिक्त प्रतिज्ञा

बाह्याद् बिन्दोर् निर्गता इष्टरेखां यावत् प्राप्ता रेखिका या भवेयुः ।
तास्वल्पिष्ठा रेखिका लम्बरूपा सम्पद्यताऽथाऽवलम्बस्य तस्य ।।
दूरे दूरे वर्तमानाः क्रमेण दीर्घा दीर्घा रेखिकास् ता भवेयुः ।
पार्श्वद्वन्द्वेऽथाऽवलम्बस्य तिष्ठद् युग्मं युग्मं रेखयोः स्यात् समानम् ।।

बीसौं प्रतिज्ञा

क्षेत्रे दोर्भिर् जायमाने त्रिभिः स्याद् बाह्वोर् योगः शेषबाहोर् महीयान् ।

एक्काइसौं प्रतिज्ञा

त्र्यस्रे बाहोः कस्यचित् प्रान्तयुग्माद् निष्क्रामन्त्योर् रेखयोर् मेलनेन ।।
अन्तस्त्र्यस्रं जायमानं त्रिकोणं पूर्वाद् बाह्यात् स्यात् त्रिकोणाल् लघीयः ।
तस्मिन् युग्मे त्र्यस्रयोर् भूमिरेका बाह्ये त्र्यस्रे शीर्षकोणो लघीयान् ।।
बाह्ये त्र्यस्रे बाहुयुग्मस्य योगो द्राघीयान् स्यात् त्र्यस्रयोस् तारतम्यात् ।

बाइसौं प्रतिज्ञा

निर्बिम्बानां सूचकानां त्रयाणाम् एकं किञ्चित् कर्मभूमौ निधाय ।।

प्रान्तद्वन्द्वं तस्य सूत्रस्य केन्द्रे प्रोक्ते शेषे सूत्रके च त्रिभज्ये ।
स्वीकृत्य द्वे मण्डले संविदध्याद् एतद्वृत्तद्वन्द्वसम्पातबिन्द्वोः ।।
एकं यावत् स्वेप्सितं केन्द्रयुग्मात् त्रिज्ये कुर्यात्, स्याद् अभीष्टं त्रिकोणम् ।
एवं रीत्या साध्यमाने त्रिकोणे प्रोक्तैः सूत्रैः संमिता बाहवः स्युः ।।
सूत्रत्रय्यां भाषितायां द्वयस्य योगो यत्र स्यात् तृतीयाद् महीयान् ।
तत्र त्र्यस्रक्षेत्ररूपस्य सिद्ध्या तत्रैवाऽस्याः स्यात् क्रियायाः प्रसङ्गः ।।

तेइसौं प्रतिज्ञा

प्रोक्तं कोणं रेखयोः साधयन्त्योस् तस्मात् कोणात् तुल्यपार्श्वे समाने ।
दूरे तिष्ठच् चिह्नयुग्मं विधाय जानीयात् तच्चिह्नयुग्माऽन्तरालम् ।।
प्रोक्तं बिन्दुं प्रोक्तरेखानिविष्टं केन्द्रं त्रिज्यां कोणचिह्नाऽन्तरालम् ।
मत्वा वृत्तं साधयेद् आद्यमेतत् पालीच्छिन्नप्रोक्तरेखाप्रदेशम् ।।
केन्द्रं त्रिज्यां चिह्नयुग्माऽन्तरालं मत्वा वृत्तं साधयेद् अन्यनाम ।
एतद्वृत्तद्वन्द्वसम्पातबिन्दुं यावद् रेखां प्रोक्तबिन्दोर् विदध्यात् ।।
प्रोक्ते बिन्दौ प्रोक्तरेखाभवे सा कोणं कुर्यात् प्रोक्तकोणेन तुल्यम् ।

चौबीसौं प्रतिज्ञा

पूर्वत्र्यस्रे संस्थितं बाहुयुग्मम् अन्त्यत्र्यस्रस्थेन बाहुद्वयेन ।।
तुल्यं पूर्वत्र्यस्रजः शीर्षकोणोऽन्त्यत्र्यस्रस्थाच् शीर्षकोणाद् महांश् च ।
चेत् स्यात् पूर्वत्र्यस्रजाता मही स्याद् दीर्घा मह्याः पश्चिमत्र्यस्रजायाः ।।

पच्चीसौं प्रतिज्ञा

पूर्वत्र्यस्रे संस्थितं बाहुयुग्मम् अन्त्यत्र्यस्रस्थेन बाहुद्वयेन ।
तुल्यं पूर्वत्र्यस्रजाता मही तु दीर्घा मह्याः पश्चिमत्र्यस्रजायाः ।।
चेत् स्यात् पूर्वत्र्यस्रजः शीर्षकोणोऽन्त्यत्र्यस्रस्थाच् शीर्षकोणाद् महान् स्यात् ।

छब्बीसौं प्रतिज्ञा

पूर्वत्र्यस्रे संस्थितं कोणयुग्मं किञ्चिद् बाहुश् चेतरस्मिंस् त्रिकोणे ।।
कोणद्वन्द्वेनोषुषा बाहुना च केनाऽपि स्याच् चेत् समानं क्रमेण ।
पूर्वत्र्यस्रे संस्थितं शिष्यमाणं कोणो बाहुद्वन्द्वमन्यत्रिकोणे ।।
शेषेण स्याद् ऊषुषा कोणकेन बाहुद्वन्द्वेनाऽपि तुल्यं क्रमेण ।
त्र्यस्रद्वन्द्वं तच् च निर्दिश्यमानम् अन्योन्यस्य स्यात् समानं तदानीम् ।।

अतिरिक्त प्रतिज्ञा

बाहूंस् त्र्यस्रक्षेत्रजान् अर्धयन्तो लम्बा युक्ता स्युस् त्रयोऽप्येकबिन्दौ ।

अतिरिक्त प्रतिज्ञा

त्र्यस्रान्तःस्थान् कोणकान् अर्धयन्त्यस् तिस्रो रेखा एकबिन्दौ मिलेयुः ।।

अतिरिक्त प्रतिज्ञा

बाहोर् मध्यं संमुखीनं च कोणं यान्ती रेखा मध्यरेखाऽभिधा स्यात् ।
त्र्यस्रे तिस्रो मध्यरेखा भवेयुस् ता एकस्मिँल् लक्षणे सम्पतेयुः ।।

सत्ताइसौं प्रतिज्ञा

सूत्रद्वन्द्वेऽन्यस्य सूत्रस्य पाताज् जातं कोणद्वन्द्वमेकान्तरस्थम् ।
तुल्यं चेत् स्यात् सूत्रयुग्मं पुरोक्तम् अन्योन्यस्य स्यात् समानान्तरस्थम् ।।

अट्ठाइसौं प्रतिज्ञा

रेखाद्वय्यां रेखिकायाः परस्याः पाताद् अन्तःसम्भवावेकदिक्स्थौ ।
कोणौ स्यातां यौ तयोः संयुतिस् तु साम्यं दध्याच् चेत् समाऽस्रद्वयेन ।।
रेखाद्वन्द्वं पूर्वनिर्दिश्यमानम् अन्योन्यस्य स्यात् समानान्तरस्थम् ।
रेखाद्वय्या सम्पतन्ती तृतीया रेखा बाह्यं कोणमुत्पादयेद् यम् ।।
सोऽन्तर्भाजा संमुखीनेन यत्र कोणेन स्यात् तुल्यताम् आददानः ।
रेखायुग्मं तत्र पूर्वप्रदिष्टम् अन्योन्यस्य स्यात् समानान्तरस्थम् ।।

उनन्तीसौं प्रतिज्ञा

रेखाद्वय्याश् चेत् समानान्तरायाश् छेदं कुर्याद् रेखिकाऽन्या तदानीम् ।
जातं कोणद्वन्द्वमेकान्तरस्थम् अन्योन्यस्मिन् स्यात् समानप्रमाणम् ।।
अन्तःस्थाया एकपार्श्वोद्भवायाः कोणद्वय्याः संयुतिश् चाऽपि तत्र ।
कोणद्वय्याः स्यात् समाया समाना बाह्ये भागे संवसन् कोणकोऽपि ।।
अन्तर्भाजा बिभ्रता स्वाऽभिमुख्यं कोणेन स्यात् तुल्यताम् आददानः ।

तीसौं प्रतिज्ञा

या या रेखा रेखिकायाः परस्या एकस्या हि स्यात् समानान्तरस्था ।।
तस्यास् तस्या रेखिकायाः प्रसिध्येद् अन्योन्यस्मिंश् चैव तुल्यान्तरत्वम् ।

एकतीसौं प्रतिज्ञा

कञ्चिद् बिन्दुं रेखिकायां निजायां कृत्वा, तस्मात् प्रोक्तबिन्दुं च यावत् ।।
रेखां कुर्यात् स्वीयया रेखया सा रेखा कोणं यत्प्रमाणं विदध्यात् ।
प्रोक्ते बिन्दौ रेखिकायां कृतायां दिग्व्यत्यासात् कुर्वती तत्प्रमाणम् ।।
कोणं रेखा या भवेद् रेखिकाया निर्दिष्टायाः सा समान्तरा स्यात् ।

बत्तीसौं प्रतिज्ञा

त्र्यस्रे बाहोः कस्यचिद् वर्धनेन बाह्ये भागे जायमानस् तु कोणः ॥
अन्तस्त्र्यस्रं तस्थुषोः कोणयोः स्याद् युत्या तुल्यः स्वाङ्गसक्ताऽस्रवर्जम् ।
अन्तस्त्र्यस्रं संस्थितायास् त्रिकोण्या योगोऽस्राभ्यां स्यात् समाभ्यां समानः ॥

तेत्तीसौं प्रतिज्ञा

रेखे तुल्ये ये समानान्तरे च जायेयातां प्रान्तयुग्मं तदीयम् ।
युञ्जीयातां रेखिके दिक्क्रमाद् ये स्यातां तुल्ये ते समानान्तरे च ॥

चौंतीसौं प्रतिज्ञा

युग्मं युग्मं बाहुजं संमुखीनं वेदास्रे चेत् स्यात् समानान्तरस्थम् ।
बाहुद्वन्द्वे संमुखीने समाने स्यातां क्षेत्रं तच्श्रुती अर्धयेताम् ॥
कोणद्वन्द्वे एककर्णाऽभिषक्ते स्यातां तुल्ये संमुखीने च तत्र ।
कर्णद्वय्या यत्र बिन्दौ युतिः स्यात् तत्र स्याताम् अर्धितौ तौ च कर्णौ ॥

अतिरिक्त प्रतिज्ञा

त्र्यस्रे बाह्वोर् मध्यबिन्दू प्रयान्ती रेखा भूमेः स्यात् समानान्तरस्था ।
सा रेखा स्याद् अर्धभूमेः समा च

अतिरिक्त प्रतिज्ञा

त्र्यस्रे बाहोर् मध्यबिन्दुं प्रयान्ती ॥
या रेखा स्याद् भूमितुल्यान्तरस्था तुल्ये खण्डे साऽन्यबाहोश् च कुर्यात् ।

अतिरिक्त प्रतिज्ञा

आत्ये श्रुत्या मध्यबिन्दोः समास्रं यान्ती रेखाऽर्धश्रुतेः स्यात् समाना ॥

अतिरिक्त प्रतिज्ञा

त्र्यस्रे बाहोः कस्यचिद् मध्यबिन्दोर् निर्गच्छन्ती संमुखीनं च कोणम् ।
प्राप्ता रेखा पूर्वबाहोर् दलेन तुल्या चेत् स्यात् पूर्वकोणः समः स्यात् ॥

अतिरिक्त प्रतिज्ञा

क्वाऽपि प्रान्ते रेखिकाया निजाया कञ्चित् कोणं कुर्वतीम् अन्यरेखाम् ।
कृत्वाऽन्यस्या रेखिकाया विभागांस् तुल्याऽऽकारान् स्वेप्सितांश् चिह्नयित्वा ॥
अन्याच् चिह्नात् स्वीयरेखाऽग्रबिन्दुं यावद् रेखां साधयित्वा च तस्याः ।
तुल्ये दूरे वर्तमानाः क्रमेण चिह्नाच् चिह्नाद् रेखिकाः संविदध्यात् ॥
एता रेखा रेखिकाया निजायास् तुल्यान् खण्डान् स्वेप्सितान् संविदध्युः ।

आयतक्षेत्रको क्षेत्रफल

स्वक्षेत्रस्था दीर्घताद्याः पदार्था यन्नाम्ना स्युर् मापिता मानकेन ।।
एकं मानं तद् दधद् यस्य बाहुर् वर्गस्य स्यात् कोष्ठकः स्यात् समः सः ।
यावन्तः स्युः कोष्ठकास् ते समाख्याः स्वस्मिन् क्षेत्रे स्यात् फलं तावदेव ।।
विस्तारघ्न्या दीर्घतायाः समाना वर्गाः कोष्ठा आयते स्युः फलाख्याः ।

वर्गक्षेत्रको क्षेत्रफल

वर्गक्षेत्रे बाहुवर्गेण तुल्या वर्गाः कोष्ठाः स्युः फलाख्यां दधानाः ।।*

पैँतीसौँ प्रतिज्ञा

रेखाद्वय्यास् तुल्यदूरे स्थिताया मध्ये भूमावेकिकायां स्थितानाम् ।
वेदास्राणां तुल्यमध्यान्तराणां तुल्यं मानं क्षेत्रसंज्ञे फले स्यात् ।।

छत्तीसौँ प्रतिज्ञा

रेखाद्वय्यास् तुल्यदूरे स्थिताया मध्ये भूमीस् तुल्यमानाः श्रितानाम् ।
वेदास्राणां तुल्यमध्यान्तराणां तुल्यं मानं क्षेत्रसंज्ञे फले स्यात् ।।

सैँतीसौँ प्रतिज्ञा

रेखाद्वय्यास् तुल्यदूरे स्थिताया मध्ये भूमावेकिकायां स्थितानि ।
त्र्यस्राणि स्युर् यानि तेषां समेषां तुल्यत्वं स्यात् क्षेत्रजाते फले हि ।।

अठतीसौँ प्रतिज्ञा

रेखाद्वय्यास् तुल्यदूरे स्थिताया मध्ये भूमीस् तुल्यमानाः श्रितानि ।
त्र्यस्राणि स्युर् यानि तेषां समेषां तुल्यत्वं स्यात् क्षेत्रजाते फले हि ।।

उनन्चालीसौँ प्रतिज्ञा

एकाऽऽधारे चैकपार्श्वे स्थितानि त्र्यस्राणि स्युस् तुल्यमानानि यानि ।
तेषां यान्ती रेखिका शीर्षबिन्दून् आधारस्य स्यात् समानान्तराला ।।

चालीसौँ प्रतिज्ञा

तुल्याऽऽधारेस्वेकरेखोद्भवेषु तुल्ये पार्श्वे तस्थुषां त्र्यस्रकाणाम् ।
साम्यं चेत् स्याच् शीर्षबिन्दूँस् तदीयान् यान्ती रेखा स्यात् समानान्तरा कोः ।।

---

* द्विप्रमाणा चतुःकरणी त्रिप्रमाणा नवकरणी चतुःप्रमाणा षोडशकरणी ।।६।।
यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान् समस्येत् ।।७।।
(कात्यायनशुल्वसूत्र, तेस्रो कण्डिका)

त्रिभुजका आवाधा

त्र्यस्रे भूमौ पातितः शीर्षकोणाल् लम्बो भूम्या युज्यते यत्र बिन्दौ ।
तस्मात् कोणौ भूमिलग्नौ हि यावद् आवाधाख्ये रेखिके द्वे भवेताम् ।।

अन्तर्लम्ब त्रिभुज

न्यूनौ कोणौ भूमिजौ चेद् भवेतां लम्बस् तिष्ठेद् अन्तरेव त्रिबाहोः ।
पार्श्वद्वन्द्वे लम्बमूलस्य सत्योर् भूम्या तुल्याऽऽवाधयोः संयुतिः स्यात् ।।

वहिर्लम्ब त्रिभुज

संपद्येत त्र्यस्रजो भूमिलग्नः कश्चित् कोणश् चेत् समास्राद् गरीयान् ।
त्र्यस्राद् बाह्ये स्यात् प्रदेशेऽवलम्बो नेदीयान् स्यात् तस्य कोणोऽधिकश् च ।।
तत्राऽऽवाधे एकदिक्के भवेतां, भूमिस् तुल्या स्यात् तयोर् अन्तरेण ।
प्रोक्तात् त्र्यस्राद् बाह्यदेशे वसन्ती लघ्वावाधा संश्रयेताऽधिकास्रम् ।।

आधारमा रहेको एउटा कोण समकोण भएमा आवाधा हुँदैनन्

त्र्यस्रे भूमावेककोणः समश् चेद् आवाधायाः स्यात् प्रसङ्गो न जातु ।

त्रिभुजको क्षेत्रफल

त्र्यस्रे भूमौ पातितं शीर्षकोणाल् लम्बं धीरा योजयन्ति क्रियायाम् ।।
त्र्यस्रे भूम्या लम्बनिघ्न्या दलेन तुल्याः कोष्ठाः स्युः फलाख्यां दधानाः ।

समानान्तर चतुर्भुजको क्षेत्रफल

वेदास्रे ये तुल्यमध्यान्तराले वक्त्राद् भूमौ लम्बकाः पातिताः स्युः ।।
सम्पद्येरंस् ते समस्ताः समाना लम्बघ्नी भूः क्षेत्रसंज्ञं फलं स्यात् ।

समलम्ब चतुर्भुजको क्षेत्रफल

वक्त्रं भूमेस् तुल्यदूरान्तरस्थं वेदास्रे स्याद् यत्र तत्राऽवलम्बाः ।।
वक्त्राद् भूमौ स्युः समानाः फलं च स्याल् लम्बघ्नं वक्त्रभूम्यैक्यखण्डम् ।

एकचालीसौँ प्रतिज्ञा

रेखाद्वय्यास् तुल्यदूरे स्थितायाः मध्ये भूमावेकिकायां त्रिकोणम् ।।
वेदास्रं च स्यात् समानान्तरं चेद् अर्धं त्र्यस्रं स्याच् चतुष्कोणकस्य ।

अतिरिक्त प्रतिज्ञा

बाहुद्वय्या प्रोक्तया प्रोक्तकोणं कुर्याद् एतद्बाहुजौ प्रान्तबिन्दू ।।
केन्द्रे, अन्यद् बाहुयुग्मं यथास्वं त्रिज्ये मत्वा वृत्तयुग्मं विदध्यात् ।
वृत्तद्वय्या योगबिन्दुं च यावत् त्रिज्यारूपं बाहुयुग्मं यथास्वम् ।।
कुर्यात्, कोणे दोःषु सर्वेषु चैव ज्ञातेषु स्यात् साधितं वेदबाहु ।

बयालीसौं प्रतिज्ञा

निर्दिष्टस्य त्र्यस्रकस्य क्षमायास् तुल्ये खण्डे संविधायाऽर्धबिन्दौ ।।
भूम्या साकं कुर्वतीं प्रोक्तकोणं रेखां कृत्वा तत्समानान्तरालाम् ।
भूमिप्रान्ताद् रेखिकां संविदध्यात् तुल्ये दूरे वर्तमानां धारित्र्याः ।।
रेखां कुर्यात् त्र्यस्रशीर्षस्थबिन्दोर् वेदास्रं स्यात् त्र्यस्रकस्याऽर्धभूमौ ।
एवं सिद्धे वेदबाहौ स्थितौ द्वौ कोणौ स्यातां प्रोक्तकोणेन तुल्यौ ।।
तद् वेदास्रं स्यात् समानान्तरालं निर्दिष्टेन त्र्यस्रकेणैव तुल्यम् ।

त्रिचालीसौं प्रतिज्ञा

क्षेत्रे वेदैर् दोर्भिरुत्पद्यमाने कञ्चित् कर्णं धेहि तुल्यान्तराले ।।
तस्मिन् कर्णे चिह्नमुत्पाद्य किञ्चित् तच्चिह्नाद् दोःकोटितुल्यान्तराले ।
रेखे कुर्यास् तेन वेदास्रकेऽस्मिन् वेदास्राणि स्युः समानान्तराणि ।।
वेदैस् तुल्यान्येषु कर्णाऽश्रिते द्वे हित्वा शिष्टे द्वे समाने भवेताम् ।

चवालीसौं प्रतिज्ञा

कुर्यात् प्रोक्तत्र्यस्रतुल्यं चतुर्भिर् दोर्भिर् जातं तुल्यमध्यान्तरालम् ।।
क्षेत्रं, तस्मिन् वेदबाहौ विदध्यात् कोणद्वन्द्वं प्रोक्तकोणेन तुल्यम् ।
तद् वेदास्रं कर्मभूमौ निधाय बाहुद्वन्द्वं वर्धयेत् कोर् अधस्तात् ।।
वृद्धौ भागौ प्रोक्तरेखासमानौ कृत्वा सूत्रं यात् तदन्तौ विदध्यात् ।
कर्णं कृत्वा नूतने वेदबाहौ वृद्धः कर्णः पूर्ववेदास्रजेन ।।
वृद्धेन स्याद् यत्र वक्त्रेण युक्तस् तस्माद् बिन्दोर् बाहुतुल्यान्तरालाम् ।
रेखां कृत्वा नव्यवेदास्रकस्य वक्त्राऽधारौ वर्धयेद् यावदेनाम् ।।
एवं सिद्धे प्रोक्तरेखासमुत्थेऽधस्ताद् निष्ठे तुल्यमध्यान्तराले ।
प्रोक्तत्र्यस्रक्षेत्रतुल्येऽस्रयुग्मं वेदास्रे स्यात् प्रोक्तकोणेन तुल्यम् ।।

अतिरिक्त प्रतिज्ञा

कञ्चित् कर्णं प्रोक्तवेदास्रकस्य कृत्वा प्रान्ताच् छ्रुत्यसक्ताद् मुखस्य ।
कुर्याद् रेखां कर्णतुल्यान्तरस्थां रेखैषा कुं यत्र वृद्धां समेयात् ।।
तस्माद् बिन्दोः कर्णसक्तं मुखस्य बिन्दु यावद् रेखिकां संविदध्यात् ।
एषा रेखा बाहुरेकः परो दोः श्रुत्या सक्तः प्रोक्तवेदास्रबाहुः ।।
वृद्धा भूमिर् भूर् इति त्र्यस्रमेतत् तुल्यं सिध्येत् प्रोक्तवेदास्रकस्य ।

अतिरिक्त प्रतिज्ञा

उक्ताम् एतां रीतिमालम्ब्य साध्यं निर्दिष्टस्य प्राज्यबाहोः समानम् ।।
अन्यत् क्षेत्रं बाहुसङ्ख्याऽन्यदीया स्याद् एकोना पूर्वबाहुप्रमाणात् ।

अतिरिक्त प्रतिज्ञा

निर्दिष्टस्य प्राज्यबाहोः समानं त्र्यस्रं साध्यं रीतिमावर्त्य चैनाम् ।।

पैंतालीसौं प्रतिज्ञा

निर्दिष्टस्य प्राज्यबाहोः समानं त्र्यस्रं कृत्वाऽथो त्रिकोणेन तेन ।
तुल्यं क्षेत्रं तुल्यमध्यान्तरालं वेदास्राख्यं साधयेद्, अत्र कोणौ ।।
स्यातां तुल्यौ प्रोक्तकोणेन चैवं निर्दिष्टस्य प्राज्यबाहोः समानम् ।
वेदास्राख्यं तुल्यमध्यान्तरालं क्षेत्रं सिध्येत् प्रोक्तकोणं दधानम् ।।

छयालीसौं प्रतिज्ञा

निर्दिष्टायां रेखिकायां तदीयात् प्रान्तद्वन्द्वाल् लम्बयुग्मं विधाय ।
निर्दिष्टाया रेखिकायाः समानौ लम्बौ कृत्वा तौ तयोः शीर्षबिन्दू ।।
यान्तीं रेखां संविदध्यात् ततः स्याद् वर्गक्षेत्रं रेखिकायां निजायाम् ।*

---

* रज्ज्वन्तयोः पाशौ करोति ।।४।।

श्रोण्यंसनिरञ्छनसङ्ख्यासमासभङ्गेषु लक्षणानि ।।५।।

प्राच्यन्तयोः शङ्कू निहन्ति ।।६।।

श्रोण्योरंसयोश्च ।।७।।

शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्वां दिशं हरन्ति ।।८।।

एवमुत्तरतः ।।९।।

विपर्यस्येतरतः ।।१०।।

स समाधिः सर्वत्र ।।११।।

प्रमाणमभ्यस्याऽभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनम् ।।१२।।

अक्ष्णया तिर्यङ्मानीशेषः ।।१३।।

प्रमाणार्द्धं वाऽभ्यस्याऽभ्यासषष्ठे लक्षणं करोति तन्निरञ्छनम् ।।१४।।

अक्ष्णया तिर्यङ्मानीशेषः ।।१५।।

प्रमाणार्द्धं समचतुरस्रस्य शङ्कुः ।।१६।।

शास्त्रवदर्द्धं दीर्घचतुरस्रस्य ।।१७।।

(कात्यायनशुल्बसूत्र, पहिलो कण्डिका)

सतचालीसौं प्रतिज्ञा

बाहोर् वर्गः कोटिवर्गेण युक्तो जात्यत्र्यस्रे कर्णकृत्या समः स्यात् ।।*

अतिरिक्त प्रतिज्ञा

त्र्यस्रे बाहुद्वन्द्वकृत्योर् वियोगः स्याद् आबाधाद्वन्द्ववर्गान्तरं च ।
दीर्घाऽबाधाम् आश्रयेद् दीर्घबाहुः स्वल्पाऽबाधां स्वल्पदोस् त्र्यस्रमात्रे ।।

---

* पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याऽक्षणया रज्जुर्दशकरणी ।।८।।

एवं द्विपदा तिर्यङ्मानी षट्पदा पार्श्वमानी तस्याऽक्षणया रज्जुश्चत्वारिंशत्करणी ९।।

दीर्घचतुरस्रस्याऽक्षणया रज्जुस्तिर्यङ्मानी पार्श्वमानी च यत् पृथग्भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ।।११।।

समचतुरस्रस्याऽक्षणया रज्जुर्द्विकरणी ।।१२।।

प्रमाणं तिर्यग् द्विकरण्यायामस्तस्याऽक्षणया रज्जुस्त्रिकरणी ।।१४।।

तुल्यप्रमाणानां समचतुरस्राणामुक्तः समासः ।।२१।।

नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोऽपच्छिन्द्यात् तस्याऽक्षणया रज्जुरुभे समस्यतीति समासः ।।२२।।

(कात्यायनशुल्बसूत्र, दोस्रो कण्डिका)

चतुरस्राच्चतुरस्रं निर्जिहीर्षन् यावन्निर्जिहीर्षेत् तावदुभयतोऽपच्छिद्य शङ्कू निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसम्मितामक्षणयां तत्रोपसंहरति समासेऽपच्छेदः सा करण्येष निर्ह्रासः ।।१।।

दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन् मध्ये तिर्यगपच्छिद्याऽन्यतरद् विभज्येतरत् पुरस्ताद् दक्षिणतश्चोपदध्याच्छेषमागन्तुना पूरयेत् तस्योक्तो निर्ह्रासः ।।२।।

अतिदीर्घं चेत् तिर्यङ्मान्याऽपच्छिद्याऽपच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसंहरेदित्येकसमासः ।।३।।

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् मध्येऽक्षणयाऽपच्छिद्य तच्च विभज्याऽन्यतरत् पुरस्तादुत्तरतश्चोपदध्याद् विषमं चेद् यथायोगमुपसंहरेदिति व्यासः ।।४।।

(कात्यायनशुल्बसूत्र, तेस्रो कण्डिका)

अठचालीसौं प्रतिज्ञा

यस्मिँस् त्र्यस्त्रे बाहुयुग्मस्य कृत्योर् युत्या तुल्या शेषबाहोः कृतिः स्यात् ।
बाहुद्वन्द्वान्तःस्थिताऽश्रेः समत्वात् त्र्यस्त्रं तत् स्याज् जात्यनाम्ना प्रसिद्धम् ।।

दोस्रो अध्याय

पहिलो प्रतिज्ञा

स्वैरं विधाय कतिचिद् गुणकस्य खण्डान् गुण्यं निहत्य शकलैर् हि पृथक् पृथक् तैः ।
युञ्जीत तानि गुणनाऽऽप्तफलानि लब्धो योगो भवेद् गुणकगुण्यवधेन तुल्यः ।।

दोस्रो प्रतिज्ञा

कस्याऽपि राशेः शकलानि कृत्वा यथेष्टमेभिः शकलैः स राशिः ।
पृथक् पृथक् चेद् निहतो वधानां युतिस् तु तद्राशिभवा कृतिः स्यात् ।।

तेस्रो प्रतिज्ञा

कस्याऽपि राशेः शकले यथेष्टं विधाय, तत्खण्डयुगस्य घातः ।
तत्खण्डयोर् अन्यतरस्य कृत्या युज्येत चेत् साधितयोगतुल्यम् ।।
गृहीतपूर्वेण हतस्य तस्य खण्डेन राशेर् गुणनाफलं स्यात् ।

चौथो प्रतिज्ञा

निजस्य राशेः शकलद्वयीष्टा क्रियेत चेत् तच्छकलद्वयस्य ।।
वधेन नेत्रा २ भिहतेन युक्तस् तत्खण्डयुग्मोद्भववर्गयोगः ।
निर्दिष्टराशेः स्वगुणीकृतस्य समप्रमाणत्वमुपाददीत ।।

पाँचौं प्रतिज्ञा

निर्दिष्टराशेः शकले समाने अतुल्यमाने अपि संविधाय ।
खण्डेन केनाऽप्यसमेन सार्कं कुर्याद् वियोगं समखण्डकस्य ।।
वियोगवर्गं सहितं विदध्याद् अतुल्ययोः खण्डकयोर् वधेन ।
इयं युतिः स्याद् गदितस्य राशेर् अर्धस्य कृत्या सदृशत्वमाप्ता ।।

अतिरिक्त प्रतिज्ञा

राश्योर् युतिः संगुणिता वियुत्या वर्गान्तरं राशियुगोद्भवं स्यात् ।
राश्योर् यथा संविहितो वियोगस् तदीयकृत्योः स तथा विधेयः ।।

अतिरिक्त प्रतिज्ञा

जात्यश्रयस्त्रे कर्णकोटयोर् वियोगो युत्या निघ्नः स्यात् कृतिर् बाहुजाता ।
बाहोः कोटेश् चाऽपि नाम्नैव भेदो जात्यश्रयस्त्रे मन्यते क्षेत्रविद्भिः ।।*

छैटौँ प्रतिज्ञा

पूर्वस्य राशेः शकले समाने विधाय राशौ प्रथमे द्वितीयम् ।
संयुज्य राशिं युतिजातराशिर् द्वितीयराशिप्रहतो विधेयः ।।
अथाप्तघाते प्रथमस्य राशेर् अर्धस्य वर्गेण युते युतिः स्यात् ।
द्वितीयराश्यर्धितपूर्वराश्योर् योगस्य वर्गेण समत्वमाप्ता ।।

सातौँ प्रतिज्ञा

निर्दिष्टराशेर् यदि खण्डयुग्मं स्वैरं विधीयेत तदाऽऽदिमेन ।
खण्डेन निघ्नो द्विगुणीकृतश् च निर्दिष्टराशिः परखण्डकेन ।।
संयोजितश् चेत् स्वगुणीकृतेन निर्दिष्टराश्यादिमखण्डकृत्योः ।
योगेन तुल्यत्वमुपाददीत सापेक्षमत्राऽऽदिपरत्वमस्ति ।।

आठौँ प्रतिज्ञा

यदृच्छया खण्डयुगं विधाय निर्दिष्टराशेर् गुणिते चतुर्भिः ।
निर्दिष्टराश्यादिमखण्डघाते युज्येत वर्गः परखण्डजश् चेत् ।।
निर्दिष्टराश्यादिमखण्डयोगवर्गेण साम्यं स दधीत योगः ।
आद्याऽन्यखण्डाऽभिधताम् उपैति पर्यायवृत्या शकलद्वयी सा ।।**

नवौँ प्रतिज्ञा

राशेः कस्याऽपि खण्डद्वितयमसदृशं स्वेच्छया खण्डयुग्मं
तुल्याऽकारं च कुर्याद् असदृशवपुषोः खण्डयोर् वर्गयोगम् ।

---

* यावत्प्रमाणानि समचतुरस्त्राण्येकीकर्तुं चिकीर्षेदेकोनानि तानि भवन्ति तिर्यग् द्विगुणान्येकत एकाधिकानि त्र्यस्त्रिर्भवित तस्येषुस्तत्करोति ।।७।।

(कात्यायनशुल्वसूत्र, छैटौँ कण्डिका)

** अर्धप्रमाणेन पादप्रमाणं विधीयते ।।८।।

तृतीयेन नवमोंऽशः ।।९।।

चतुर्थेन षोडशी कला ।।१०।।

(कात्यायनशुल्वसूत्र, तेस्रो कण्डिका)

कुर्यात् स्याद् एष योगः कृतियुगलभवो वक्ष्यमाणात् तु कृत्योर्
योगाद् द्विघ्नोऽथ कुर्याद् असदृशसमयोः खण्डयोर् अन्तरं च ।।
वर्गेणाऽस्या वियुत्याः समशकलभवं वर्गमाढ्यं विदध्याल्
लब्धोऽयं वर्गयोगः करण इह भवेद् वक्ष्यमाणाऽभिधानः ।

दसौं प्रतिज्ञा

राशेः पूर्वस्य कृत्वा समशकलयुगं पूर्वराशौ द्वितीयं
राशिं संयुज्य राशिद्वितययुतिकृतौ चेद् द्वितीयस्य राशेः ।।
वर्गो युज्येत वर्गद्वितययुतिरियं वक्ष्यमाणाद् द्विनिघ्नी
स्याद् वर्गद्वन्द्वयोगाद् अथ समशकले पूर्वराशिप्रजाते ।
युक्त्वा राशिं द्वितीयं युतिजनितकृतौ पूर्वराश्युद्भवस्य
युञ्जीताऽर्धस्य वर्गं कृतियुगलयुतिः स्याद् इयं वक्ष्यमाणा ।।

अतिरिक्त प्रतिज्ञा

शीर्षस्थाऽस्त्राद् मध्यबिन्दुं धारित्र्या यान्ती रेखा स्वा।ऽहता भूदलस्य ।
कृत्या युक्ता स्यात् समाना त्रिबाहौ बाहुद्वय्या वर्गयुत्या बलेन ।।

अतिरिक्त प्रतिज्ञा

तुल्यैर् वेदैर् दोर्भिरुत्पद्यमानं क्षेत्रं यत् स्यात् तत् समानान्तरं स्यात् ।
तस्मिन् कर्णौ वेदबाहौ भवेताम् अन्योन्यस्मिन् अर्धयन्तौ च लम्बौ ।।
कर्णद्वय्या वर्गयोगश् च तस्मिन् बाह्वोः कृत्या स्याच् चतुर्ण्या समानः ।

अतिरिक्त प्रतिज्ञा

क्षेत्रे वेदैर् दोर्भिरुत्पद्यमाने चेद् स्याद् संज्ञा तुल्यमध्यान्तराला ।।
दोष्णां योगः स्वा।ऽहतानां चतुर्णां कर्णद्वय्या वर्गयुत्या समः स्यात् ।

एघारौं प्रतिज्ञा

निर्दिष्टायां रेखिकायां पुरस्ताद् वर्गाकारं क्षेत्रमेकं विदध्यात् ।।
तत्र प्रोक्तां रेखिकाम् आश्रितस्य बाहोर् अर्धं कस्यचित् संविदध्यात् ।
बाहोर् मध्यात् प्रोक्तरेखाऽग्रबिन्दुं यावत् कुर्याद् रेखिकां कर्णरूपाम् ।।
निर्दिष्टाया रेखिकायाः पुरस्ताच् छिन्नं बाहुं वर्धयेत् तावदेव ।
यावद् बाहोर् मध्यबिन्दोस् तु वृद्धरेखाऽग्रं स्यात् कर्णरेखासमानम् ।।
वर्गक्षेत्रात् स्याद् बहो रेखिका या तस्यां ह्रस्वं वर्गमन्यं विदध्यात् ।
यस्मिन् बिन्दौ ह्रस्ववर्गस्य बाहोः प्रान्तो युक्तः प्रोक्तया रेखया स्यात् ।।
निर्दिष्टाया रेखिकायास् तु तत्र जायेयातां ह्रस्वदीर्घौ विभागौ ।

ह्रस्वाद् वर्गात् स्याद् बाहिर् ह्रस्वखण्डं दीर्घं खण्डं ह्रस्ववर्गस्य बाहुः ।।
प्रोक्ता रेखा ह्रस्वखण्डेन निघ्नी स्वघ्नेन स्याद् दीर्घखण्डेन तुल्या ।

बाह्रौं प्रतिज्ञा

त्र्यस्रे भूमावेककोणोऽधिकश्चेद् एतं कोणं सेवमानस्य बाहोः ।।
वर्गः पृथ्वीवर्गयुग् द्व्या २ हतेन लब्धाबाधाभूमिघातेन योज्यः ।
सम्पद्येताऽनेन योगेन तुल्यः शेषो बाहुः स्वेन सङ्गुण्यमानः ।।

तेह्रौं प्रतिज्ञा

त्र्यस्रे बाहुं कञ्चन क्ष्मां प्रकल्प्य भूमौ लम्बः शीर्षकोणाद् निपात्यः ।
पृथ्वीलग्नं न्यूनकोणं तु कञ्चिद् इष्टं कोणं कल्पयेद् भाविकार्ये ।।
आबाधा या संश्रयेद् इष्टकोणम् इष्टाऽऽबाधा सैव संचिन्तनीया ।
इष्टं कोणं सेवमानस्य बाहोर् वर्गः कार्यो भूमिवर्गेण युक्तः ।।
लब्धं योगं चिन्तयेद् आद्यसंज्ञम् इष्टाऽऽबाधां द्व्या २ हतां भूमिनिघ्नीम् ।
युञ्ज्याद् वर्गे शिष्यमाणस्य बाहोर् एतं योगं संस्मरेद् अन्यनाम्ना ।।
आद्याऽन्यौ तौ तुल्यमानौ भवेताम् एषा रीतिः स्यात् समस्ते त्रिकोणे ।

चौधौं प्रतिज्ञा

निर्दिष्टस्य प्राज्यबाहोः समानं क्षेत्रं कुर्याद् आयतं तस्य वक्त्रम् ।।
कुर्यात् तावद् वर्धितं यावदेष भागः सिध्येद् वर्धितो बाहुतुल्यः ।
अर्धं युत्या वक्त्रबाहूद्भवायास् त्रिज्यां केन्द्रं चाऽर्धबिन्दुं तमेव ।।
मत्वा कुर्याद् आयतस्योपरिष्ठाद् वृत्तस्याऽर्धं वर्धयित्वाऽऽयतस्य ।
बाहुं यावद् वृत्तपालिं विदध्याद् वर्गक्षेत्रं वर्धिते बाहुभागे ।।
वर्गक्षेत्रं सिद्धमेवं प्रसिध्येद् निर्दिष्टस्य प्राज्यबाहोः समानम् ।

तेस्रो अध्याय

पहिलो प्रतिज्ञा

कृत्वा काञ्चित् पूर्णजीवां स्ववृत्ते मत्स्येनाऽस्यास् तुल्यखण्डद्वयस्य ।
कर्त्रीं वृत्तान्तःस्थितां वृत्तपालीबिन्दू यान्तीं रेखिकां संविदध्यात् ।।
सा रेखा स्याद् व्यासरेखाऽथ तस्या मध्यं विद्याद् मत्स्यमन्यं विधाय ।
एवं ज्ञातो व्यासगो मध्यबिन्दुः सम्पद्येत प्रोक्तवृत्तस्य केन्द्रम् ।।

दोस्रो प्रतिज्ञा

वृत्तक्षेत्रे पूर्णजीवा भवेद् या तस्माद् वृत्तात् सा भवेद् नैव बाह्या ।

तेस्रो प्रतिज्ञा

वृत्ते केन्द्रात् पात्यमानोऽवलम्बः पूर्णज्यायाम् अर्धयेत् पूर्णमौर्वीम् ।।
यत् पूर्णज्याम् अर्धयेत् केन्द्रगामि सूत्रं तत् स्याल् लम्बरूपं च तस्याम् ।

चौथो प्रतिज्ञा

अन्तर्वृत्तं केन्द्रवर्जे तु बिन्दौ छिन्दीयातां पूर्णजीवे मिथो ये ।।
तत्रैका स्याद् अर्धिता वा न वा स्यात् ते द्वे स्याताम् अर्धिते नैव जातु ।

पाँचौं प्रतिज्ञा

अन्योन्यं यत् सम्पतेद् वृत्तयुग्मं स्यातां केन्द्रे एकबिन्दौ तयोर् न ।।

छैटौं प्रतिज्ञा

अन्योन्यं यत् संस्पृशेद् वृत्तयुग्मं स्यातां केन्द्रे एकबिन्दौ तयोर् न ।

सातौं प्रतिज्ञा

वृत्तान्तःस्थात् केन्द्रवर्जात् कुतश्चिद् बिन्दोः पालिं जग्मुषां सूत्रकाणाम् ।।
द्राघिष्ठं स्यात् केन्द्रगं व्यासखण्डं केन्द्राऽगामि व्यासखण्डं ह्रसिष्ठम् ।
द्राघिष्ठस्य व्यासखण्डस्य दूरं सूत्रं ह्रस्वं स्यात् समीपाच् च सूत्रात् ।।
अल्पिष्ठस्य व्यासखण्डस्य दूरं सूत्रं दीर्घं स्यात् समीपाच् च सूत्रात् ।
पार्श्वद्वन्द्वे व्यासखण्डद्वयस्य द्वे द्वे सूत्रे तुल्यमाने भवेताम् ।।

आठौं प्रतिज्ञा

वृत्तं छित्वा वृत्तबाह्यात् कुतश्चिद् बिन्दोः पालिं गच्छतां सूत्रकाणाम् ।
द्राघिष्ठं स्यात् केन्द्रगं छेदसूत्रं केन्द्रं गन्तुश् छिन्दतः सूत्रकस्य ।।
दूरे संस्थाच् छेदसूत्राद् महीयः स्याद् आसन्नं सूत्रकं छेदनाख्यम् ।
द्राघिष्ठस्य च्छेदसूत्रस्य पार्श्वद्वन्द्वे द्वे द्वे छेदसूत्रे समे स्ताम् ।।
तेषाम् एव चिछन्दतां सूत्रकाणां खण्डानि स्युर् वृत्तबाह्यानि यानि ।
केन्द्रं गन्तुश् छिन्दतः सूत्रकस्य बाह्यं खण्डं स्याद् ह्रसिष्ठं च तेषु ।।
तस्माद् दूरं बाह्यखण्डं महीयः स्याद् आसन्नाद् वृत्तबाह्याच् च खण्डात् ।
पार्श्वद्वन्द्वेऽल्पिष्ठखण्डस्य संस्थे द्वे द्वे स्यातां बाह्यखण्डे समाने ।।

नवौं प्रतिज्ञा

यस्माद् बिन्दोर् मण्डलान्तर्निविष्टात् पालीं यावद् रेखिकाः प्राप्नुवत्यः ।
तिस्रस् ताभ्यो भूरयो वा समाः स्युर् बिन्दुः स स्यात् तस्य वृत्तस्य केन्द्रम् ।।

दसौँ प्रतिज्ञा

अन्योन्यं चेद् मण्डले सम्पतेतां स्यातां योगावेव तद्वृत्तपाल्योः ।

एघारौँ प्रतिज्ञा

एकं वृत्तं मण्डलस्येतरस्य बाह्यं स्पर्शं वाऽऽन्तरं चेद् विदध्यात् ।।
वृत्तद्वन्द्वस्याऽस्य केन्द्रे प्रयान्ती रेखा गच्छेद् वर्धिता स्पर्शबिन्दुम् ।

बाह्रौँ प्रतिज्ञा

अन्योन्यं चेत् संस्पृशेद् वृत्तयुग्मम् एकत्रैव स्यात् तयोः पालियोगः ।।

तेह्रौँ प्रतिज्ञा

वृत्ते केन्द्रात् संस्थितास् तुल्यदूरे पूर्णा जीवाः स्युः समानप्रमाणाः ।
वृत्ते तुल्याः पूर्णजीवाश् च केन्द्रात् तुल्ये दूरे वर्तमाना भवेयुः ।।

चौधौँ प्रतिज्ञा

वृत्ते पूर्णज्यासु विष्कम्भसूत्रं द्राघिष्ठं स्यात् केन्द्रबिन्द्वन्तिकस्या ।
पूर्णज्या स्याज् ज्यायसी पूर्णमौर्व्या दूरे देशे केन्द्रबिन्दोः स्थितायाः ।।
द्राघीयस्याः पूर्णमौर्व्याः समीपं क्षोदीयस्या दूरगं केन्द्रकं स्यात् ।

पन्ध्रौँ प्रतिज्ञा

वृत्ते पालीत्रिज्ययोर् योगबिन्दौ त्रिज्यासूत्रे या भवेल् लम्बरेखा ।।
पाल्या एकं बिन्दुमेव स्पृशन्ती सम्पद्येत स्पर्शरेखाऽत्र सैव ।

सोह्रौँ प्रतिज्ञा

प्रोक्ताद् बाह्याद् बिन्दुतः प्रोक्तवृत्तकेन्द्रं यावद् रेखिकां संविधाय ।।
अस्या अर्धं त्रिज्यकां मध्यबिन्दुं केन्द्रं मत्वा वृत्तमन्यद् विदध्यात् ।
वृत्तद्वन्द्वस्याऽस्य सम्पातबिन्दू यावद् रेखे प्रोक्तबिन्दोर् विदध्यात् ।।
प्रोक्ताद् बाह्याद् बिन्दुतो मण्डलस्य प्रोक्तस्यैते स्पर्शरेखे भवेताम् ।

सत्रौँ प्रतिज्ञा

वृत्तक्षेत्रे स्पर्शरेखापरिध्योर् योगस्थानं केन्द्रबिन्दुं च गच्छत् ।।
सूत्रं तेन स्पर्शसूत्रेण साकं कुर्यात् तस्मिन् स्पर्शबिन्दौ समास्रम् ।

अठारौँ प्रतिज्ञा

वृत्ते पालीस्पर्शरेखायुतिस्थः केन्द्रं गच्छेत् स्पर्शसूत्रेऽवलम्बः ।।

उन्नाइसौँ प्रतिज्ञा

एकं चापं मण्डले संश्रयन्तौ पालीलग्नः केन्द्रलग्नश् च कोणौ ।
जायेयातां चेत् तदा केन्द्रगस्य कोणस्याऽर्धं पालिगः कोणकः स्यात् ।।

बीसौं प्रतिज्ञा

एकं चापं मण्डले संश्रयन्तः पालीभाजः कोणकाः स्युः समानाः ।

अतिरिक्त प्रतिज्ञा

एकाऽऽधारस्थानि शीर्षस्थकोणान् तुल्याऽऽकारान् बिभ्रति त्र्यस्रकाणि ।
यावन्ति स्युस् तावतः शीर्षकोणान् वृत्तस्यैकस्यैव गाहेत नेमिः ॥
साधारण्यं बिभ्रती त्र्यस्रकाणां भूः स्यात् तस्मिन् मण्डले पूर्णजीवा ।

एक्काइसौं प्रतिज्ञा

क्षेत्रे वृत्तान्तर्गते वेदबाहौ जायेयातां कोणकौ संमुखीनौ ॥
यो तत्कोणद्वन्द्वजाता युतिस् तु कोणद्वय्याः स्यात् समायाः समाना ।

अतिरिक्त प्रतिज्ञा

क्षेत्रे दोर्भिर् जायमाने चतुर्भिः कोणद्वन्द्वं यद् भवेत् संमुखीनम् ॥
तद्योगश् चेत् स्यात् समास्रद्वयेन तुल्यः क्षेत्रं तद् भवेद् वृत्तमध्ये ।

बाइसौं प्रतिज्ञा

एकाऽऽधारे पूर्वजीवास्वरूपे तुल्ये पार्श्वे तस्थुषां नैव जातु ॥
साजात्यं स्यात् कार्मुकक्षेत्रकाणां पालीभाजां कोणकानाम् असाम्यात् ।

तेइसौं प्रतिज्ञा

तुल्याऽऽधारस्थानि साजात्यभाञ्जि तुल्यानि स्युः कार्मुकक्षेत्रकाणि ॥

चौबीसौं प्रतिज्ञा

दृष्टे चापे क्वाऽपि बिन्दुं विधाय तस्माद् बिन्दोर् धन्वनः प्रान्तयुग्मम् ।
यावद् रेखे पूर्णजीवाऽऽनुकारे कुर्याद् रेखे ते उभे अर्धयन्तौ ॥
लम्बौ कुर्याल् लम्बयोर् योगबिन्दुं केन्द्रं, केन्द्राद् धन्वबिन्दुं च यावत् ।
त्रिज्यां मत्वा साधिते मण्डले स्याद् अन्तर्भावो धन्वनो लक्षितस्य ॥

पच्चीसौं प्रतिज्ञा

केन्द्रोत्पन्नाः केन्द्रजैर् वा वृतिस्थाः पालीभाग्भिः कोणकाः कोणकैश् चेत् ।
सम्पद्येरंस् तुल्यवृत्तेषु तुल्याश् चापाः स्युस् तत्कोणभाजः समानाः ॥

छब्बीसौं प्रतिज्ञा

तुल्यांश् चापांस् तुल्यवृत्तेषु जातान् अध्यासीनाः कोणका ये भवेयुः ।
केन्द्रोत्पन्नाः केन्द्रजैः पालिजाश् च पालीभाग्भिस् तेषु तुल्या भवेयुः ॥

सत्ताइसौं प्रतिज्ञा

चापा लग्नास् तुल्यपूर्णज्यकासु सम्पद्येरंस् तुल्यवृत्तेषु तुल्याः ।

अट्ठाइसौं प्रतिज्ञा

सम्पद्येरन् कार्मुकाणां समानां तुल्याः पूर्णज्याः सदृङ्मण्डलेषु ।।

उनन्तीसौं प्रतिज्ञा

पूर्णां जीवां प्रोक्तचापस्य कृत्वा तस्यास् तुल्यं कुर्वतीं खण्डयुग्मम् ।
रेखां कुर्याद् मीनयुक्त्येयमेव तुल्यौ भागौ प्रोक्तचापस्य कुर्यात् ।।

तीसौं प्रतिज्ञा

पालीलग्नः संश्रयन्नर्धवृत्तं कोणो भागैः स्याद् नवत्या ९० समानः ।
चापश् चेत् स्याद् अर्धवृत्ताद् महीयान् पालीजः स्यात् कोणको न्यूननामा ।।
चापश् चेत् स्याद् अर्धवृत्ताल् लघीयान् गच्छेत् कोणः पालिलग्नोऽधिकत्वम् ।

अतिरिक्त प्रतिज्ञा

एका।ऽधारे कर्णरूपे स्थितानां जात्यानां स्याद् ऊर्ध्वगं वृत्तमेकम् ।।
कर्णा।ऽकारा सा च भूर् ऊर्ध्वगस्य वृत्तस्य स्यात् तस्य विष्कम्भरूपा ।

एकतीसौं प्रतिज्ञा

वृत्तस्पर्शं कुर्वता सूत्रकेण स्पृष्टाद् बिन्दोर् निर्गता नेमिसंस्थात् ।।
रेखा वृत्तच्छेदिका. स्पर्शबिन्दौ कोणौ कुर्याच् चापयुग्मं च वृत्ते ।
पालीलग्नौ धन्वनी ते श्रयन्तौ जायेयातां कोणकौ यौ तयोस् तु ।।
तुल्याऽ।वस्था स्पर्शबिन्दूद्भवाभ्यां कोणाभ्यां स्यात् पार्श्वयोर् वैपरीत्यात् ।

बत्तीसौं प्रतिज्ञा

एकप्रान्ते प्रोक्तरेखासमुत्थे कुर्याद् रेखां कुर्वतीं प्रोक्तकोणम् ।।
सूत्रद्वय्याः संयुतौ नव्यसूत्रे लम्बा।ऽकारं सूत्रमन्यद् विदध्यात् ।
निर्दिष्टाया रेखिकायाः समानौ भागौ कुर्वल् लम्बसूत्रं च कुर्यात् ।।
लम्बद्वय्याः संयुतिं केन्द्रबिन्दुं तस्मात् केन्द्रात् प्रोक्तरेखाऽ।न्त्यबिन्दुम् ।
यावत् त्रिज्यां कल्पयित्वा कृतस्य वृत्तस्य स्यात् पूर्णजीवोक्तरेखा ।।
तां पूर्णज्यां संश्रिते जायमाने प्रोक्तः कोणः कार्मुकेऽन्तर्गतः स्यात् ।

तेत्तीसौं प्रतिज्ञा

कृत्वा रेखां संस्पृशन्तीं स्ववृत्तं प्रोक्तं कोणं कुर्वतीं स्पर्शबिन्दौ ।।
रेखां वृत्तं छिन्दतीं संविदध्याच् छेदाज् जाते प्रोक्तकोणाऽन्यदिक्स्थे ।

चापे पाल्यां जायमानस् तु कोणो यः स्यात् स स्यात् प्रोक्तकोणेन तुल्यः ।।
एवं प्रोक्ते मण्डले चाप इष्टः सम्पद्येत प्रोक्तकोणं दधानः ।

चौंतीसौं प्रतिज्ञा

पूर्णज्ये चेद् मण्डले सम्पतेतां खण्डद्वय्या एकपूर्णज्यकायाः ।।
घातेन स्याद् अन्यपूर्णज्यकायाः खण्डद्वय्या आहतिस् तुल्यमाना ।

पैंतीसौं प्रतिज्ञा

चेद् वृत्तस्य च्छेदनस्पर्शरेखे स्यातां बिन्दोर् वृत्तबाह्यात् कुतश्चित् ।।
छिन्दत् सूत्रं वृत्तबाह्येन निघ्नं स्वेनाऽङ्गेन स्पर्शरेखाकृतिः स्यात् ।

अतिरिक्त प्रतिज्ञा

सम्पद्येरन् वृत्तबाह्यात् कुतश्चिद् बिन्दोर् वृत्तच्छेदिका रेखिका याः ।।
स्वीयैः खण्डैर् वृत्तबाह्यैर् हताः स्युः सर्वा रेखाश् छेदिकास् ताः समानाः ।

छत्तीसौं प्रतिज्ञा

निर्गच्छन्त्यौ वृत्तबाह्यात् कुतश्चिद् बिन्दोर् वृत्तच्छेदिका रेखिकैका ।।
अन्या रेखा युञ्जती वृत्तनेम्यां सम्पद्येते वृत्तबाह्योद्भवेन ।
स्वेनाऽङ्गेन च्छेदरेखा विनिघ्नी चेत् स्याद् वर्गो योगरेखासमुत्थः ।।
नेम्यां योगं कुर्वती रेखिका सा सम्पद्येत स्पर्शरेखास्वरूपा ।

चौथो अध्याय

पहिलो प्रतिज्ञा

कञ्चिद् बिन्दुं प्रोक्तवृत्तस्य पाल्यां केन्द्रं, प्रोक्तां रेखिकां च त्रिभज्याम् ।
मत्वा कुर्याद् मण्डलं वृत्तयुग्मयोगं यावत् पूर्वबिन्दोश् च रेखाम् ।।
कुर्यात् सा स्यात् पूर्णजीवोक्तवृत्ते निर्दिष्टाया रेखिकायाः समाना ।
प्रोक्ता रेखा चेद् भवेत् प्रोक्तवृत्तव्यासाद् न्यूना स्यात् क्रियायाः प्रसङ्गः ।।

दोस्रो प्रतिज्ञा

वृत्ते काञ्चित् स्पर्शरेखां विधाय पार्श्वद्वन्द्वे स्पर्शबिन्दौ तयैव ।
निर्दिष्टाभ्यां कोणकाभ्यां समानौ कोणौ कुर्यौ पूर्णजीवे विदध्यात् ।।
ततपूर्णज्यानेमियोगौ प्रयान्तीम् अन्यां पूर्णज्यां विदध्यात् ततः स्युः ।

वृत्तान्तःस्थे जायमाने त्रिकोणे सर्वे कोणा इष्टकोणैः समानाः ।।
त्र्यस्रक्षेत्रे प्रच्छकेनोपदिष्टे कोणा ये स्युः तेऽत्र वाच्या अभीष्टाः ।

तेस्रो प्रतिज्ञा

वृत्ते काञ्चित् त्रिज्यकां संविधाय पार्श्वद्वन्द्वे केन्द्रबिन्दौ त्रिमौर्व्याः ।।
निर्दिष्टाऽस्रद्वन्द्वजस्पर्धितुल्यौ कोणौ कुर्यौ त्रिज्यके संविदध्यात् ।
एतत्त्रिज्यानेमियोगत्रयेऽथ कुर्याद् वृत्तस्पर्शरेखाश् च तिस्रः ।।
तासां योगाज् जायमानं त्रिकोणं स्पर्शं कुर्याद् मण्डलस्योपरिष्टात् ।
तस्मिँस् त्र्यस्रे कोणकाः स्युः समस्ताः प्रोक्तैः कोणैस् तुल्यताम् आददानाः ।।
त्र्यस्रक्षेत्रे भाषिते तस्थिवांसः कोणा ग्राह्याः प्रोक्तकोणाख्ययाऽत्र ।

चौथो प्रतिज्ञा

त्र्यस्रे कोणावर्धयन्त्यौ च रेखे युज्येयातां यत्र बिन्दौ तमेव ।।
केन्द्रं, केन्द्रात् कुत्रचित् त्र्यस्रबाहौ संस्थं लम्बं त्रिज्यकां कल्पयित्वा ।
वृत्तं कुर्यात् सर्वबाहून् स्पृशत् तत् सम्पद्येत स्वत्रिकोणस्य मध्ये ।।

पाँचौँ प्रतिज्ञा

त्र्यस्रे बाहू अर्धयन्तौ तयोश् च बाह्वोर् लम्बौ यत्र युक्तौ तदेव ।
केन्द्रं, केन्द्रात् कञ्चन त्र्यस्रकोणं यान्तीं रेखां त्रिज्यकां कल्पयित्वा ।।
वृत्तं साध्यं सर्वकोणाऽवगाहि तद् वृत्तं स्यात् स्वत्रिकोणोपरिस्थम् ।

छैटौँ प्रतिज्ञा

कृत्वा व्यासं कञ्चन प्रोक्तवृत्ते तस्मिँल् लम्बं व्यासमन्यं विदध्यात् ।।
तद्व्यासाभ्यां प्रोक्तवृत्तस्य तुल्याश् चत्वारः स्युः पालिजाता विभागाः ।
कुर्यात् तेषां कार्मुकाणां चतुर्णां तुल्याऽकाराः पूर्णजीवाश् चतस्रः ।।
वर्गक्षेत्रं पूर्णजीवाभिराभिः सम्पद्येत प्रोक्तवृत्तस्य मध्ये ।

सातौँ प्रतिज्ञा

कृत्वा व्यासं कञ्चन प्रोक्तवृत्ते तस्मिँल् लम्बं व्यासमन्यं विदध्यात् ।।
लम्बान् व्यासप्रान्तबिन्दूपरिस्थान् वेदैस् ४ तुल्यान् स्पर्शरेखास्वरूपान् ।
कुर्याद् एतांल् लम्बकान् पार्श्वयुग्मे स्वीये स्वीये वर्धितांश् चाऽपि कुर्यात् ।।
सम्पृक्ताभी रेखिकाभिश् च ताभिर् वर्गः सिध्येत् प्रोक्तवृत्तोपरिस्थः ।

आठौँ प्रतिज्ञा

प्रोक्ते वर्गेऽन्योन्यसम्पृक्तबाह्वोस् तुल्यौ भागौ कुर्वतोर् लम्बयोर् यः ।।
योगः स्यात् तं केन्द्रबिन्दुं, त्रिभज्यां बाहोर् अर्धं कल्पयित्वा च वृत्तम् ।

कुर्यात् तत् स्यात् प्रोक्तवर्गस्य मध्ये वर्गक्षेत्रस्पर्शकारीष्टवृत्तम् ।।

नवौं प्रतिज्ञा

प्रोक्ते वर्गे कर्णयुग्मं विधाय केन्द्रं मत्वा कर्णसम्पातबिन्दुम् ।
कर्णस्याऽर्धं त्रिज्यकां कल्पयित्वा वृत्तं कुर्यात् प्रोक्तवर्गोपरिस्थम् ।।

दसौं प्रतिज्ञा

इष्टा रेखा स्वाऽल्पखण्डेन निघ्नी वर्गः स्वस्य स्याद् महाखण्डकस्य ।
यस्यां रीत्यां तां समालम्ब्य कुर्याद् अल्पाऽनल्पाविष्टरेखाविभागौ ।।
यस्या भागौ साधितौ पूर्वरूपौ तत्त्रिज्याकं मण्डलं संविदध्यात् ।
तस्मिन् वृत्ते स्थूलभागेन तुल्यां पूर्णां जीवां संविधायाऽथ तस्याः ।।
प्रान्तद्वन्द्वात् केन्द्रगे त्रिज्यके द्वे कुर्यात् त्र्यस्रं स्यात् समानद्विबाहु ।
तस्मिँस् त्र्यस्रे कोणकौ भूमिलग्नौ स्यातां कोणाच् शीर्षगाद् द्विघ्नमानौ ।।

एघारौं प्रतिज्ञा

यस्मिन् कोणौ भूगतौ शीर्षकोणाद् द्विघ्नौ स्यातां तत् त्रिकोणं निजस्य ।
वृत्तस्याऽन्तः संविधायाऽथ कोणावाधारस्थावर्धयन्त्यौ विदध्यात् ।।
द्वे पूर्णज्ये, तत्त्रिकोणस्थकोणाः पूर्णज्याऽग्रे चेति वृत्तस्य तस्य ।
सम्पद्येरन् बिन्दवः पञ्च पाल्यां द्वौ द्वौ बिन्दू सन्निकृष्टौ च तेषु ।।
यान्तीः कुर्याच् शिञ्जिनीः पञ्च पूर्णास् ताभिः पञ्चास्रं भवेद् वृत्तमध्ये ।
पञ्चास्रेऽस्मिन् बाहवः स्युः समाना अन्योन्यस्मिन् कोणकाश् चैव तुल्याः ।।

बाह्रौं प्रतिज्ञा

तुल्यान् कोणान् पञ्च बाहूँश् च गृह्णत् क्षेत्रं कुर्यात् प्रोक्तवृत्तस्य मध्ये ।
पालीपञ्चास्राऽस्रसंयोगबिन्दून् यान्तीर् वृत्तस्पर्शरेखाश् च पञ्च ।।
कुर्यात् ताभिर् मण्डलस्योपरिस्थं पञ्चास्रं स्यात् तुल्यदोस् तुल्यकोणम् ।

तेह्रौं प्रतिज्ञा

तुल्यान् कोणान् पञ्च बाहूँश् च गृह्णत् क्षेत्रं यत् स्यात् तस्य सम्पृक्तबाह्वोः ।।
तुल्यौ भागौ कुर्वतोर् लम्बयोः स्याद् यस्मिन् बिन्दौ संयुतिस् तां हि केन्द्रम् ।
केन्द्राद् बाहोर् मध्यबिन्दुं च यावत् त्रिज्यां मत्वा मण्डलं संविदध्यात् ।।
एतद् वृत्तं संस्पृशत् पञ्च बाहून् स्याद् अन्तःस्थं प्रोक्तपञ्चास्रकस्य ।

चौधौं प्रतिज्ञा

तुल्यैः कोणैः पञ्चभिर् बाहुभिश् च जाते क्षेत्रे तस्थिवांसौ समीपौ ।।
कोणौ कुर्याद् अर्धितावर्धयन्त्यौ रेखे स्यातां यत्र संयुज्यमाने ।

युत्या बिन्दुं तं हि वृत्तस्य मध्यं मत्वा त्रिज्यां केन्द्रकोणान्तरालम् ।।
वृत्तं कुर्यात् सर्वकोणाऽवगाहि वृत्तं तत् स्यात् प्रोक्तपञ्चास्रबाह्यम् ।

पन्ध्रौँ प्रतिज्ञा

कञ्चिद् बिन्दुं प्रोक्तवृत्तस्य पाल्यां केन्द्रं मत्वा पूर्वया त्रिज्ययैव ।।
वृत्तं कुर्याद् वृत्तयुग्मस्य सन्धी यान्तौ व्यासौ प्रोक्तवृत्तस्य कुर्यात् ।
पूर्वं बिन्दुं पालिगं च प्रयान्तं व्यासं कुर्याद् मण्डले प्रोक्त एव ।।
एता तिस्रो व्यासरेखा विदध्युः पालौ बिन्दून् षण्मितान् प्रोक्तवृत्ते ।
द्वौ द्वौ बिन्दू सन्निकृष्टौ प्रयान्तीर् वृत्तेऽस्मिन् षट् पूर्णजीवा विदध्यात् ।।
तुल्यैः षड्भिर् बाहुभिस् तुल्यकोणं क्षेत्रं सिध्येत् प्रोक्तवृत्तस्य मध्ये ।

अतिरिक्त प्रतिज्ञा

वृत्ते परीणाहषडंशजाता पूर्णज्यका व्यासदलेन तुल्या ।।
भवेद् अतस् तुल्यषडस्रकस्य दोष्णा समा स्याद् हृदयाख्यरज्जुः ।

सोह्रौँ प्रतिज्ञा

तुल्यैः कोणैः पञ्चभिर् बाहुभिश् च जातं क्षेत्रं तुल्यबाहु त्रिकोणम् ।।
चेति क्षेत्रे संयुतैकैककोणे प्रोक्ते वृत्ते पूर्वयुक्त्या विदध्यात् ।
क्षेत्रद्वय्याः प्रोक्तवृत्ते कृतायाः कोणद्वय्याः संयुतायाः पुरस्तात् ।।
पाल्या भागात् पञ्चमात् प्राङ् निषण्णे शेषे भागे यस् तृतीयांशकस्य ।
चापस् तिष्ठेत् तस्य तुल्यौ विभागौ कृत्वा कुर्याद् अर्धचापप्रजाताम् ।।
पूर्णां जीवां, तन्मिताः पूर्णजीवा अन्याः कुर्याद् संयुता वेदचन्द्रान् १४ ।
तुल्यैः कोणैः पञ्चचन्द्रैर् १५ भुजैश् च क्षेत्रं सिध्येत् प्रोक्तवृत्तस्य मध्ये ।।

अतिरिक्त प्रतिज्ञा

घातः पालीव्यासयोर् वेद ४ भक्तो वृत्तक्षेत्रे क्षेत्रसंज्ञं फलं स्यात् ।

छैटौँ अध्याय

पहिलो प्रतिज्ञा

त्र्यस्रद्वय्यां यत्र लम्बौ समानौ जायेयातां तत्र भूमिद्वयोत्थः ।
यः सम्बन्धः स्यात् स सम्बन्ध एव त्र्यस्रद्वय्याश् चैव सिध्येत् फलोत्थः ।।
त्र्यस्रद्वय्यां यत्र भूम्यौ समाने जायेयातां तत्र लम्बद्वयोत्थः ।
यः सम्बन्धः स्यात् स सम्बन्ध एव त्र्यस्रद्वय्याश् चैव सिध्येत् फलोत्थः ।।
क्षेत्रद्वय्यां स्यात् समानान्तरायां वेदा ४ स्रायां रीतिरेषैव सिद्धा ।

दोस्रो प्रतिज्ञा

त्र्यस्रे रेखा भूसमानान्तरा चेत् कुर्याद् बाह्वोः खण्डके पूर्वबाहोः ।।
खण्डद्वय्या यो गुणः स्यात् स एव खण्डद्वय्या अन्यबाहोर् गुणः स्यात् ।
खण्डद्वय्याः पूर्वबाहोर् गुणो यः खण्डद्वय्या अन्यबाहोर् गुणः सः ।।
यस्मिँस् त्र्यस्रे सम्भवेत् तत्र खण्डे कर्त्री रेखा भूसमानान्तरा स्यात् ।

तेस्रो प्रतिज्ञा

त्र्यस्रे रेखा शीर्षकोणाऽर्धकर्त्री खण्डद्वन्द्वं यद् धरित्र्या विदध्यात् ।।
एतत्खण्डद्वन्द्वजो यो गुणः स्यात् सम्बन्धः स्याद् बाहुयुग्मोद्भवः सः ।
खण्डद्वय्या भूमिजाया गुणश् चेत् त्र्यस्रे बाह्वोः स्यात् समानो गुणेन ।।
रेखा यान्ती शीर्षकोणं कुखण्डे कर्त्री च स्याच् शीर्षकोणाऽर्धकर्त्री ।

अतिरिक्त प्रतिज्ञा

त्र्यस्रे बाहोः कस्यचिद् वर्धनेन शीर्षोत्पत्तेर् बाह्यकोणस्य तुल्ये ।।
खण्डे कर्त्री रेखिका वर्धितेनाऽधारेण स्याद् यत्र संयुज्यमाना ।
तस्माद् बिन्दोर् भूमिलग्नौ च कोणौ यावद् यान्त्यो रेखयोर् यो गुणः स्यात् ।।
बाहुद्वय्याश् चाऽपि सिध्येद् गुणः स त्र्यस्रे प्रान्ताद् वर्धिताया धरित्र्याः ।
भूस्थौ कोणौ रेखयोर् यातवत्योर् या निष्पत्तिः सैव बाह्वोश् च चेत् स्यात् ।।
वृद्धं प्रान्तं कोः शिरोऽस्त्रं च यान्ती रेखा बाह्यं ह्यर्धयेच् शीर्षकोणम् ।

चौथो प्रतिज्ञा

आद्ये त्र्यस्रे वर्तमाना त्रिकोणी त्र्यस्रेऽन्यस्मिन् संवसन्त्या त्रिकोण्या ।।
तुल्या स्याच् चेत् त्र्यस्रयुग्मस्य तस्य तुल्यं तुल्यं कोणमुत्पादयित्रोः ।
बाह्वोर् बाह्वोर् एकरूपो गुणः स्यात् तस्माद् दोष्णाम् अत्र सिद्धोऽनुपातः ।।

पाँचौं प्रतिज्ञा

आद्ये त्र्यस्त्रे संस्थितानां भुजानां त्र्यस्त्रेऽन्यस्मिन् बाहुभिर् वर्तमानैः ।
सम्पन्नश् चेत् स्यात् क्रमेणाऽनुपातस् त्र्यस्त्रे स्यातां ते उभे तुल्यकोणे ।।

छैटौं प्रतिज्ञा

आद्ये त्र्यस्त्रे संस्थितः कोण एकस् त्र्यस्त्रेऽन्यस्मिन्नूपुषा कोणकेन ।
एकेन स्यात् तुल्यमानस् तथैव पूर्वत्र्यस्त्रे संस्थितं तुल्यकोणम् ।।
कर्त्रोर् बाह्वोर् यो गुणः स्याद् गुणः स त्र्यस्त्रेऽन्यस्मिन् संस्थितं तुल्यकोणम् ।
कर्त्रोर् बाह्वोश् चैव चेत् स्यात् त्रिकोणे जायेयातां ते उभे तुल्यकोणे ।।

सातौं प्रतिज्ञा

आद्ये त्र्यस्त्रे तस्थिवान् एककोण एकाऽस्त्रेणाऽन्यत्रिकोणे स्थितेन ।
तुल्यस् तस्मात् कोणमन्यं विधात्रोर् बाह्वोर् आद्यत्र्यस्त्रभाजोर् गुणो यः ।।
बाह्वोर् अन्यत्र्यस्त्रभाजोर् गुणः स आद्ये त्र्यस्त्रे संस्थितः शेषकोणः ।
यन्नामा स्याद् नाम बिभ्रत् तदेव त्र्यस्त्रेऽन्यस्मिन् संस्थितः शेषकोणः ।।
चैव स्यात् चेत् ते उभे बह्नि ३ कोणे जायेयातां तुल्यकोणान् दधाने ।

आठौं प्रतिज्ञा

जात्यत्र्यस्त्रे बाहुकोटचैक्यबिन्दोः कर्णक्ष्मायां लम्बपातात् प्रजाते ।।
जात्ये स्यातां तुल्यकोणे, तदीयं साजात्यं स्यात् पूर्वजात्येन चैव ।

अतिरिक्त प्रतिज्ञा

जात्यत्र्यस्त्रे बाहुकोटचैक्यबिन्दोः कर्णक्ष्मायां लम्बरेखानिपातात् ।।
आबाधे ये उद्भवेतां तदीये सम्बन्धे स्याद् मध्यमे, लम्ब एषः ।
स्वा।ऽबाधायाः पूर्वकर्णस्य चैव सम्बन्धे स्याद् मध्यमे स्वीयबाहुः ।।

नवौं प्रतिज्ञा

प्रोक्ते रेखे योजयित्वैकरेखां कृत्वा तस्यास् तुल्यखण्डे विदध्यात् ।
एकं खण्डं त्रिज्यकाम्, अर्धबिन्दुं केन्द्रं मत्वा साधयेद् अर्धवृत्तम् ।।
रेखाद्वय्याः संयुतौ भाषिताया लम्बं कृत्वा तत्र तं वर्धयेत ।
पालीं यावत् प्रोक्तयो रेखयोः स्यात् सिद्धो लम्बो मध्यसम्बन्धनिष्ठः ।।

दसौं प्रतिज्ञा

आद्याऽन्याभ्यां रेखिकाभ्यां विधाय न्यूनं कोणं वर्धयेद् आद्यरेखाम् ।
यावत् तावद् वृद्धभागः प्रसिध्येद् अन्याख्याया रेखिकायाः समानः ।।

प्रान्तावाद्यान्यस्थितौ गाहमानां रेखां कृत्वा तत्समानान्तरस्थाम् ।
रेखां कुर्याद् वृद्धभागाऽन्त्यबिन्दोस् तत्पर्यन्तं वर्धयेच् चाऽन्यरेखाम् ।।
आद्याऽन्योत्थे वर्तमानस् तृतीये सम्बन्धे स्याद् वृद्धभागोऽन्यदीयः ।

एघाह्रौं प्रतिज्ञा

तार्तीयीकीम् आदिमां रेखिकां च युक्त्वा कुर्याद् न्यूननामानमस्त्रम् ।।
आद्यां रेखां वर्धयेत् तावदस्या वृद्धो भागो यावता स्याद् द्वितीया ।
तार्तीयीक्या आदिमायाश् च सीमे सङ्गच्छन्तीं रेखिकां संविधाय ।।
अस्या दूरे वर्तमानां समाने रेखां कृत्वा वृद्धभागाऽन्त्यबिन्दोः ।
तत्पर्यन्तं वर्धिता स्यात् तृतीया तार्तीयीक्या वृद्धभागोऽयमेव ।।
निर्दिष्टानां सूत्रकाणां त्रयाणां सम्बन्धे स्याद् वर्तमानश् चतुर्थे ।

बाह्रौं प्रतिज्ञा

न्यूनं कोणं प्रोक्तसूत्रेण साकं कुर्वत् कुर्याद् नूतनसूत्रं लघीयः ।।
नूत्नं सूत्रं वर्धयेद् वृद्धभागो येनैतस्मात् पूर्णसङ्ख्यागुणः स्यात् ।
प्रान्तौ रेखाद्वन्द्वजौ संप्रयान्तीं रेखां कृत्वा तत्समानान्तरस्थाम् ।।
रेखां प्रान्ताद् नूतनरेखासमुत्थात् कुर्याच् छिन्द्यात् सा तु निर्दिष्टरेखाम् ।
ऊर्ध्वं खण्डं प्रोक्तरेखासमुत्थं प्रोक्तां रेखां शेषहीनं भजेत ।।

तेह्रौं प्रतिज्ञा

युञ्जीताऽग्रे रेखयोर् येन कोणो न्यूनः सिध्येद् एतयोर् अन्तरस्थः ।
एतत्प्रान्तौ गाहमानां तृतीयां रेखां कृत्वा, तत्समानान्तरस्थाः ।।
प्रान्तात् प्रान्ताद् आद्यरेखोत्थखण्डनिष्ठात् कुर्याद् रेखिकास् ताभिरिष्टाः ।
अन्यस्याः स्यू रेखिकाया विभागाः साजात्यं स्यात् पूर्वखण्डैर् यदीयम् ।।

चौधौं प्रतिज्ञा

द्वे वेदा ४ स्रे तुल्यमध्यान्तराले विन्देयातां तुल्यमेकैकमस्त्रम् ।
बाहू पूर्वक्षेत्रजौ तुल्यकोणं स्वीकुर्वन्तावादितुर्यत्वमेत्य ।।
बाहू अन्यक्षेत्रजौ तुल्यकोणं स्वीकुर्वन्तौ मध्यराशित्वमाप्य ।
सम्पद्येरँश् चाऽनुपाताऽश्रिताश् चेत् ते वेदा ४ स्रे तुल्यमाने भवेताम् ।।
वेदा ४ स्राख्यं तुल्यमध्यान्तरालं क्षेत्रद्वन्द्वं वर्तते तुल्यमानम् ।
पूर्वक्षेत्रे संस्थितः कोणकोऽपि क्षेत्रेऽन्यस्मिँस् तस्थुषा कोणकेन ।।
तुल्यश् चेत् स्यात् तुल्यकोणं विधात्रोर् बाह्वोर् बाह्वोर् एकरूपो गुणः स्यात् ।

पन्ध्रौं प्रतिज्ञा

क्षेत्रे दोर्भिर् वह्नि ३ तुल्यैः समुत्थे विन्देयातां तुल्यमेकैकमस्रम् ।
बाहू पूर्वक्षेत्रजौ तुल्यकोणं स्वीकुर्वन्तावादितुर्यत्वमेत्य ।।
बाहू अन्यत्र्यस्रजौ तुल्यकोणं स्वीकुर्वन्तौ मध्यराशित्वमाप्य ।
सम्पद्येरंश् चाऽनुपाताऽऽश्रिताश् चेत् त्र्यस्रे स्यातां ते उभे तुल्यमाने ।।
क्षेत्रद्वन्द्वं वह्नि ३ बाहून् दधानं तुल्यं मानं क्षेत्रसंज्ञं बिभर्ति ।
पूर्वे त्र्यस्रे संस्थितः कोण एकः क्षेत्रेऽन्यस्मिँस् तस्थुषा कोणकेन ।।
तुल्यश् चेत् स्यात् तुल्यकोणं विधात्रोर् बाह्वोर् बाह्वोर् एकरूपो गुणः स्यात् ।

सोह्रौं प्रतिज्ञा

चत्वारः स्यू राशयो येऽनुपाते पाटयां बीजे क्षेत्रमित्यां च तेषु ।।
राशिद्वय्या आदिमाऽन्त्याऽऽह्वयाया हत्या तुल्यो मध्यराश्योर् वधः स्यात् ।
आद्यो राशिर् हन्यमानोऽन्तिमेन चेत् स्यात् तुल्यो मध्यराश्योर् वधेन ।।
वेदैस् ४ तुल्या राशयोऽमी क्रमेण सम्पद्येरँस् तस्थिवांसोऽनुपाते ।

सत्रौं प्रतिज्ञा

राशित्रय्याम् एव यत्राऽनुपातः सम्पूर्णः स्यात् तत्र मध्यस्य राशेः ।।
द्विःस्थायित्वात् तस्य कृत्या समानः सिध्येद् घातः पूर्वपाश्चात्यराश्योः ।
तार्तीयीको राशिराद्येन निघ्नः सिध्येद् वर्गश् चेद् द्वितीयस्य राशेः ।।
राशित्रय्याम् एव तस्यां निषण्णः संदृश्येत स्पष्टरूपोऽनुपातः ।

अठारौं प्रतिज्ञा

त्र्यस्रद्वय्या आनुरूप्यं दधत्याः सम्बन्धः स्याद् यः फलोत्थः स एव ।।
सम्बन्धः स्यात् तत्र साजात्यभाजोर् बाह्वोः कृत्योश् चाऽपि संविद्यमानः ।

उन्नाइसौं प्रतिज्ञा

बाहून् वेदान् ४ भूयसो वा दधाने भक्ते कर्णैस् त्र्यू ३ नबाहुप्रमाणैः ।।
क्षेत्रेऽभीष्टे द्व्यू २ नबाहुप्रमाणां सम्पद्येत त्र्यस्रकाणां निवासः ।
बाहून् वेदान् ४ भूयसो वा दधत्यां क्षेत्रद्वय्याम् आनुरूप्यं वहन्त्याम् ।।
त्र्यस्राणि स्युर् जायमानानि यानि तेषां सिध्येद् आनुरूप्यं क्रमेण ।
क्षेत्रद्वय्याः स्यात् फलोत्थो गुणो यः कृत्योर् बाह्वोः स्यात् स साजात्यभाजोः ।।

बीसौं प्रतिज्ञा

प्रान्तद्वन्द्वे प्रोक्तरेखासमुत्थे प्रोक्तत्र्यस्रस्थायिनाऽऽस्रद्वयेन ।
तुल्यौ कोणौ कर्तृणी सूत्रके द्वे कृत्वा युञ्ज्यात् स्याद् नवीनं त्रिकोणम् ।।

नूत्नं त्र्यस्रं प्रोक्तरेखानिविष्टं प्रोक्तत्र्यस्रस्याऽऽनुरूप्यं दधीत ।
कर्णं कृत्वा प्रोक्तवेदा ४ स्रकस्य त्र्यस्राकारे खण्डके संविदध्यात् ॥
खण्डस्यैकस्याऽऽनुरूप्यं दधानं प्रोक्ते सूत्रे संनिषण्णं त्रिकोणम् ।
कृत्वा, भूयः शेषखण्डाऽनुरूपं कुर्यात् त्र्यस्रं नूतनत्र्यस्रलग्नम् ॥
एवं प्रोक्ते सूत्रके वेद ४ बाहु प्रोक्तस्य स्याद् वेद४बाहोः सरूपम् ।
एवं प्रोक्तप्राज्यबाहोः सरूपं क्षेत्रं साध्यं प्रोक्तरेखोपरिस्थम् ॥

एक्काइसौं प्रतिज्ञा

एकस्यैव क्षेत्रकस्याऽऽनुरूप्यं चेद् भूयांसि क्षेत्रकाण्यादधीरन् ।
अन्योन्यस्मिँश् चाऽपि सर्वेषु तेषु सम्पद्येत क्षेत्रकेष्वानुरूप्यम् ॥

बाइसौं प्रतिज्ञा

रेखाः कुर्युर् याश् चतस्रोऽनुपातं तासां स्यातां ये युगे तत्र जाते ।
साजात्यस्थे क्षेत्रयुग्मे भवेतां ये ताभ्यां च स्यात् प्रसिद्धोऽनुपातः ॥
युग्मं युग्मं क्षेत्रकाणां चतुर्णां साजात्यस्थं चेच् श्रयेताऽनुपातम् ।
तत्क्षेत्रस्था रेखिका भूस्वरूपाः सम्पद्येरँश् चाऽनुपाते वसन्त्यः ॥

तेइसौं प्रतिज्ञा

क्षेत्रे वेदैर् ४ दोर्भिरुत्पद्यमाने कश्चित् कर्णं धेहि तुल्यान्तराले ।
तस्मिन् कर्णे चिह्नमुत्पाद्य किञ्चित् तच्चिह्नाद् दोःकोटितुल्यान्तराले ॥
रेखे कुर्यात् तेन वेदा४स्रकेऽस्मिन् वेदा४स्राणि स्युः समानान्तराणि ।
वेदैस् ४ तुल्याऽन्येषु कर्णाश्रिते द्वे स्यातां पूर्वक्षेत्रसाजात्यभाजी ॥
ते वेदा ४ स्रे कर्णमासेवमाने अन्योन्यस्मिँश् चाऽऽनुरूप्यं वहेताम् ।

चौबीसौं प्रतिज्ञा

एकं कोणं सेवमानानि यानि वेदा ४ स्राणि स्युः समानान्तराणि ॥
साजात्यं चेत् तेषु वर्तेत तानि सम्पद्येरन्नेककर्णाऽऽश्रितानि ।

पच्चीसौं प्रतिज्ञा

चेद् वेदा ४ स्रे तुल्यमध्यान्तराले बिभ्रीयातां तुल्यमेकैकमस्रम् ॥
बाह्वोर् हत्योः श्लिष्टयोर् यो गुणः स्यात् क्षेत्रद्वय्याः स्यात् फलोत्थो गुणः सः ।

छब्बीसौं प्रतिज्ञा

क्षेत्रस्याऽऽदेस् तुल्यमेतद्धराऽऽधोभागे तिष्ठत् तुल्यमध्यान्तरालम् ॥
वेदा ४ स्राख्यं क्षेत्रमादौ विधाय तस्मिँल् लग्नं क्षेत्रकस्याऽपरस्य ।
तुल्यं कुर्यात् तादृशं वेद ४ बाहु क्षेत्रे एते वेद४बाहून् दधाने ॥

कुर्याद् भूमावेकिकायां निषण्णे एतद्भूम्योर् मध्यसम्बन्धनिष्ठाम् ।
रेखां कृत्वा रेखिकायां च तस्यां क्षेत्रस्याऽऽदेर् आनुरूप्यं दधानम् ।।
क्षेत्रं कुर्याद् नूतनं क्षेत्रमेतत् सिध्येत् तुल्यं क्षेत्रकस्याऽपरस्य ।

सत्ताइसौं प्रतिज्ञा

निर्दिष्टाया रेखिकायाः समाने कृत्वा खण्डे अर्धरेखोपरिस्थम् ।।
वेदा ४ स्राख्यं तुल्यमध्यान्तरालं कुर्याद् भूयः पूर्वरेखासमुत्थे ।
अल्पाऽनल्पे खण्डके संविधाय दीर्घे खण्डे तुल्यमध्यान्तरालम् ।।
वेदा ४ स्राख्यं तादृशं संविदध्याद् अल्पे खण्डे संस्थितं येन तादृक् ।
वेदा ४ स्रं स्याद् अर्धरेखोद्भवस्य साजात्यस्थं पूर्ववेदा ४ स्रकस्य ।।
अत्र क्षेत्राद् अर्धरेखाप्रजातात् क्षेत्रं न्यूनं दीर्घखण्डोद्भवं स्यात् ।

अट्ठाइसौं प्रतिज्ञा

पूर्वप्रोक्तत्र्यस्रकादेः समानं निर्दिष्टस्याऽन्यस्य तुल्यान्तरस्य ।।
क्षेत्रं कुर्याद् वेद ४ बाहोः सरूपं तार्तीयीकं क्षेत्रमेतत् प्रसिद्धम् ।
प्रोक्तां रेखाम् अर्धयित्वाऽऽपसव्ये तस्या अर्धे क्षेत्रमन्यानुरूपम् ।।
तुर्यं कृत्वा पञ्चमं तत्स्वरूपं क्षेत्रं कुर्यात् प्रोक्तरेखोपरिस्थम् ।
अर्धे सव्ये रेखिकाया निजाया जातं क्षेत्रं चेत् तृतीयेन तुल्यम् ।।
सम्पद्येत क्षेत्रकेणाऽस्मदीयम् इष्टं क्षेत्रं सव्यगं स्यात् तदेव ।
तार्तीयीकाद् यावता स्याद् महीयस् तुर्यं क्षेत्रं तावदन्यानुरूपम् ।।
कुर्यात् षष्ठं क्षेत्रकं षष्ठनिष्ठशीर्षस्थास्रस् तुर्यशीर्षास्रकेण ।
एकीभूतो वामभागे यथा स्याद् न्यस्येत् षष्ठं क्षेत्रकं तत् तथैव ।।
तुर्यक्षेत्रस्थायिनोः कोटिबाह्वोस् तुल्ये दूरे संस्थिते रेखिके द्वे ।
षष्ठाऽधोऽस्रात् संविदध्याद् अभीष्टं वेदा ४ स्रं स्यात् तुल्यमध्यान्तरालम् ।।
निर्दिष्टाया रेखिकाया दलेन षष्ठक्षेत्रस्था धरा युज्यमाना ।
वक्त्रं बाह्वोर् अन्तरं तुर्यषष्ठभाजोर् बाहुः क्षेत्रके स्याद् अभीष्टे ।।
पूर्वोक्तस्य त्र्यस्रकादेः समानं निर्दिष्टस्याऽन्यस्य तुल्यान्तरस्य ।
क्षेत्रस्य स्याद् वेद ४ बाहोः सरूपम् एवं सिद्धं क्षेत्रमिष्टाभिधानम् ।।
शेषे भागे प्रोक्तरेखासमुत्थे सिद्धं क्षेत्रं स्याद् अभीष्टानुरूपम् ।
तुर्यक्षेत्राच् चेत् तृतीयं महत् स्यात् प्रोक्तायाः स्याद् नो क्रियायाः प्रसङ्गः ।।

उनन्तीसौं प्रतिज्ञा

प्रोक्तां रेखाम् अर्धयित्वाऽऽपसव्ये तस्या अर्धेऽन्यस्य तुल्यान्तरस्य ।
वेदा ४ स्रस्याऽऽभाषितस्याऽनुरूपं क्षेत्रं कुर्यात् तत् तृतीयाभिधं स्यात् ।।

पूर्वंप्रोक्तं त्र्यस्रकाद्यं तृतीये क्षेत्रे युक्त्वा तेन योगेन तुल्यम् ।
क्षेत्रस्याऽन्यस्याऽनुरूपं दधानं क्षेत्रं कुर्यात् स्याच् चतुर्थाभिधानम् ।।
सव्ये तुर्यक्षेत्रभूमिं विवर्ध्य वृद्धं भागं प्रोक्तरेखादलेन ।
तुल्यं कुर्याद्, वृद्धभागान्त्यबिन्दोस् तार्तीयीकक्षेत्रभूस्थाच् च कोणात् ।।
तुर्यक्षेत्रस्थायिनोः कोटिबाह्वोस् तुल्ये दूरे संस्थिते रेखिके द्वे ।
कुर्याद् वेदैर् ४ दोर्भिरुत्पद्यमानम् इष्टं क्षेत्रं स्यात् समानान्तराख्यम् ।।
निर्दिष्टाया रेखिकाया दलेन तुर्यक्षेत्रस्थायिनी भूः समेता ।
भूमिः क्षेत्रे स्याद् अभीष्टे चतुर्थतार्तीयीकस्थायिबाह्वन्तरं दोः ।।
पूर्वप्रोक्तत्र्यस्रकादेः समानं निर्दिष्टस्याऽन्यस्य तुल्यान्तरस्य ।
क्षेत्रस्य स्याद् वेद ४ बाहोः सरूपम् एवं सिद्धं क्षेत्रमिष्टाभिधानम् ।।
निर्दिष्टाया रेखिकाया बहिस्थेऽभीष्टक्षेत्राधारभागे निषण्णम् ।
वेदा ४ स्रं स्यात् तुल्यमध्यान्तरं यद् इष्टक्षेत्रस्याऽनुरूपं भवेत् तत् ।।

तीसौं प्रतिज्ञा

इष्टा रेखा स्वाऽल्पखण्डेन निघ्नी वर्गः स्वस्य स्याद् महाखण्डकस्य ।
यस्यां रीत्यां तां समालम्ब्य कुर्याद् अल्पाऽनल्पाविष्टरेखाविभागौ ।।
तद्रेखाया ह्रस्वखण्डस्य चैव सम्बन्धे स्याद् मध्यमे दीर्घखण्डम् ।

एकतीसौं प्रतिज्ञा

आद्यत्र्यस्रे तस्थिवान् पूर्वबाहुर् अन्यत्र्यस्रस्थस्य पूर्वस्य दोष्णः ।।
आद्यत्र्यस्रे वर्तमानो ऽन्यबाहुर् अन्यत्र्यस्रस्थायिनो ऽन्यस्य दोष्णः ।
संबिभ्राणः स्यात् समानान्तरत्वं चत्वारस् ते बाहवश् चाऽनुपाते ।।
स्युश् चेद् एतत्त्र्यस्रयोर् युज्यमाने भूमी स्याताम् एकिका रेखिकैव ।

बत्तीसौं प्रतिज्ञा

जात्यस्थान् दोःकोटिकर्णाञ् श्रयन्ति क्षेत्राणि स्युर् यानि साजात्यभाञ्जि ।।
दोःकोटिस्थक्षेत्रयोस् तत्र योगः क्षेत्रेण स्यात् कर्णभाजा समानः ।

तेत्तीसौं प्रतिज्ञा

वृत्ते तुल्ये वा न तुल्ये भवेतां वृत्तद्वन्द्वे चापयोर् यो गुणः स्यात् ।।
तत्कोदण्डस्थायिनोः केन्द्रभाजोः पालीभाजोर् वा ऽस्रयोः स्याद् गुणः सः ।

अतिरिक्त प्रतिज्ञा

त्र्यस्रे रेखा या ऽर्धयित्वा शिरो ऽस्रं भूमेः खण्डे संविदध्यात् तदीयः ।।
वर्गः पृथ्वीखण्डयुग्मोत्थहत्या युक्तः सिध्येद् बाहुयुग्मोत्थघातः ।

एघाह्रौँ अध्याय

पहिलो प्रतिज्ञा

एकाङ्गं स्वं भूतले यत्र तिष्ठेत् सम्पूर्णाङ्गी रेखिका तद् न जह्यात् ।

दोस्रो प्रतिज्ञा

यत् स्यात् रेखायुग्ममन्योन्यसक्तम् एकत्रैव क्ष्मातले स्यात् स्थितं तत् ।।
तिस्रो रेखा यास् त्रिकोणं विदध्युर् एकत्रैव क्ष्मातले ता वसेयुः ।

अतिरिक्त प्रतिज्ञा

प्रोक्तां रेखां तद्बहिःस्थं च बिन्दुम् एकाकि स्यात् क्ष्मातलं गाहमानम् ।।

तेस्रो प्रतिज्ञा

छिन्दीयातां भूतले द्वे मिथश् चेच् छिन्नोऽध्वा स्याद् रेखिकाऽऽकारशाली ।
सावारण्यं बिभ्रती रेखिका सा सम्पद्येत क्ष्मातलद्वन्द्व एव ।।

चौथो प्रतिज्ञा

रेखाद्वय्यां संयुतौ लम्बरूपा रेखा सिध्येद् भूतले तत्र लम्बः ।
ते निर्दिष्टे रेखिके युज्यमाने स्यातां यस्मिन् भूतले वर्तमाने ।।

पाँचौँ प्रतिज्ञा

रेखात्रय्यां योगबिन्दौ युतायाम् अन्या रेखा चेद् भवेल् लम्बरूपा ।
ता निर्दिष्टा रेखिकास् तिस्र एव सम्पद्येरन्नेकपृथ्वीतलस्थाः ।।

छैटौँ प्रतिज्ञा

एकत्रैव क्ष्मातले लम्बरूपं रेखायुग्मं स्यात् समानान्तरस्थम् ।

सातौँ प्रतिज्ञा

रेखाद्वय्याः स्यात् समानान्तराया एकत्रैव क्ष्मातले संनिवासः ।।
ते द्वे रेखे गाहमानाऽन्यरेखा च स्यात् तत्र क्ष्मातले यत्र ते द्वे ।

आठौँ प्रतिज्ञा

सूत्रद्वय्यां तुल्यमानान्तरायाम् एकं सूत्रं भूतले यत्र लम्बः ।।
सम्पद्येत क्ष्मातले तत्र सूत्रम् अन्यच् च स्याल् लम्बताम् एव बिभ्रत् ।

नवौं प्रतिज्ञा

या या रेखा रेखिकायाः परस्या एकस्या हि स्यात् समानान्तरस्था ।।
तस्यास् तस्या रेखिकायाः प्रसिध्येद् अन्योन्यस्मिँश् चैव तुल्यान्तरत्वम् ।
एकत्रैव क्ष्मातले संनिवासो नाऽत्राऽपेक्ष्यः प्रोक्तरेखासमुत्थः ।।

दसौं प्रतिज्ञा

रेखाद्वय्याः संयुतायाः समेतं रेखायुग्मं चेत् समानान्तरं स्यात् ।
रेखाद्वय्योर् एतयोः संयुतिभ्यां जातौ कोणौ तुल्यमानौ भवेताम् ।।
रेखाद्वय्योर् अत्र नाऽऽवश्यकः स्याद् एकत्रैव क्ष्मातले संनिवासः ।

एघाह्रौं प्रतिज्ञा

काञ्चिद् रेखां भूतले स्वे विलिख्य तस्यां लम्बं बाह्यबिन्दोर् अभीष्टात् ।।
कुर्यात् सोऽयं भूतले स्वेऽपि लम्बो जातु स्याच् चेत् सिद्धमस्माकमिष्टम् ।
नो चेद् रेखालम्बयोर् योगबिन्दोर् लम्बं स्वस्मिन् भूतले संनिविष्टम् ।।
कुर्यात्, तस्यां रेखिकायाम् अथाऽस्मिँल् लम्बे लम्बं बाह्यबिन्दोर् अभीष्टात् ।
कुर्यात्, सोऽयं बाह्यबिन्दोर् अभीष्टात् सम्पद्येत क्ष्मातले स्वेऽवलम्बः ।।

बाह्रौं प्रतिज्ञा

संनिर्दिष्टे भूतले तद्बहिःस्थात् स्वैरं बिन्दोर् लम्बसूत्रं विधाय ।
अस्माल् लम्बात् सर्वतस् तुल्यदूरा प्रोक्तं बिन्दुं प्रोक्तपृथ्वीतलस्थम् ।।
यान्ती रेखा साधनीया भवेत् सा लम्बः प्रोक्ते भूतले प्रोक्तबिन्दोः ।

तेह्रौं प्रतिज्ञा

बाह्याद् बिन्दोः स्वाऽऽश्रिताद् बिन्दुतो वा स्याद् एकैव क्ष्मातले लम्बरेखा ।।

चौधौं प्रतिज्ञा

एका रेखा भूतलद्वन्द्वमाप्ता तद्द्वन्द्वेऽपि स्याद् यदा लम्बरूपा ।
ते निर्दिष्टे भूतले वर्धमाने जातु स्यातां नैव संयुज्यमाने ।।

पन्ध्रौं प्रतिज्ञा

युक्ते रेखे आद्यपृथ्वीतलस्थे अन्यत्रैव क्ष्मातले संस्थिताभ्याम् ।
संयुक्ताभ्यां रेखिकाभ्यां क्रमेण जायेयातां चेत् समानान्तरस्थे ।।
आद्याऽन्याख्ये भूतले वर्धमाने जायेयातां जातु नो युज्यमाने ।

सोह्रौं प्रतिज्ञा

छिद्येयातां चेत् समानान्तरस्थे द्वे अन्येन क्ष्मातले क्ष्मातलेन ।।
छिन्नाऽध्वानौ रेखिके ये भवेतां जायेयातां ते च तुल्यान्तरस्थे ।

सत्रौं प्रतिज्ञा

रेखायुग्मं चेत् समानान्तरेण संछिद्येत क्ष्मातलानां त्रयेण ।।
अन्तस् तेषां छेदकक्ष्मातलानां चत्वारि स्यू रेखिकाखण्डकानि ।
खण्डद्वय्या आद्यरेखोद्भवाया निष्पत्तिः स्यात् तत्र या यत्क्रमेण ।।
खण्डद्वय्या अन्यरेखोद्भवाया निष्पत्तिः स्यात् सैव तेन क्रमेण ।

अठारौं प्रतिज्ञा

रेखां क्वाऽपि क्ष्मातले लम्बरूपां क्रोडीकुर्वत् क्ष्मातलं स्याद् यदन्यत् ।।
तत् स्यात् तत्र क्ष्मातले लम्बरूपं रेखोक्ताऽऽस्ते यत्र लम्बस्वरूपा ।

उन्नाइसौं प्रतिज्ञा

चेद् एकस्मिन् भूतले लम्बरूपे स्याताम् अन्ये भूतले युज्यमाने ।।
तस्मिन्नेव क्ष्मातले योगरेखा तद्युग्मोत्था लम्बरूपत्वमेयात् ।

बीसौं प्रतिज्ञा

कोणाः कुर्युस् त्र्यादयो ये घनास्रं तेषाम् एकः स्याल् लघुः शेषयोगात् ।।

एक्काइसौं प्रतिज्ञा

एकं कोणं साधयन्तो घनाख्यं सम्पद्येरन् कोणकास् त्र्यादयो ये ।
तेषां योगः कोणकानां समेषां कोणेभ्योऽल्पः स्यात् समेभ्यश् चतुर्भ्यः ।।

०—०

पर राष्ट्रमन्त्रालयमा रहेका, विक्रमको उन्नाइसौँ शताब्दीको चौथो पाउका अहिलेसम्म प्रकाशमा नआएका, ६ वटा पत्र

–महेशराज पन्त

(१ सङ्ख्या)

श्रीः ᗣ

सं. १८७८ शा. श्रावणशुदि ७ रोज १[1] जनरलबाट काजी जस्पाउ थापाके———

१. श्रावणवदि ६।१२ सुदी १ रोज २।५।२[2] को मितिका पत्र ३ आइपुग्या
२. अर्थ मालुम भयो उप्रान्त बोधे बस्न्या बिरु षत्रीले आफ्नी स्वास्नीलाई
३. २ वोट लात्तले हान्दा १४।१५ घरीपछी स्वास्नी मरीछ सोधपुछ ग-
४. र्दा पनी तेतिकै ठहऱ्यो षत्री भन्या धर्ना बसीरहेछ भनी आफ्ना निज

---

१. वि. सं. १८७८ श्रावणशुक्ल

	गते	वार	तिथि	घडी	पला
श्रावण	२३	आदित्य	सप्तमी	२६ ।	५१

(पात्रोबाट)

२. वि. सं. १८७८ श्रावणकृष्ण (पूर्णान्तमानले)

	गते	वार	तिथि	घडी	पला
श्रावण	१०	सोम	नवमी	२७ ।	२६
श्रावण	१३	बृहस्पति	द्वादशी	१२ ।	२२

(पात्रोबाट)

वि. सं. १८७८ श्रावणशुक्ल

	गते	वार	तिथि	घडी	पला
श्रावण	१७	सोम	प्रतिपद्	५ ।	६

(पात्रोबाट)

५. कुरासमेत लेष्याका अर्थ स्वास्नीलाइ लात्तले हानी मार्न्या बिरु षत्रीला-
६. इ जाँही झिकाउन्या ठहरियो तसर्थ तेस् षत्रीलाइ नेल हाली सिपाही
७. साथ लगाई बाटमा नउम्कन्या गरी जाहीँ पठाइदेउ बाँकी १५।१६ वर्ष
८. पर्देस रहँदा घरको बन्दोबस्त गर्न पायाको छैन सन्तान पनी छैन एस् षा-
९. नगीले मेरो गुजस्ता चलेन अस्तिका चिठीमा जागीरको बिस्तार लेषिया-
१०. को हो घरबाट चिठी आयो सबै कुरा बिसह्यार भयो भनी लेषि आयेछ एस्
११. पाला मलाइ झिकिदिनुभया बढिया होला भनी लेष्याका अर्थ बढिया
१२. हो तिम्रा चित्तमा तेस्तो छ भन्या दसैका ताकमा सर्कारमा बिन्ती पार्न्या काम गरौला शुभम्—

(२ सङ्ख्या)

श्रीदुर्गाज्यू १

१. स्वस्ति श्रीमन्महाराजाधिराजकस्य रुक्का — — — — — — —
२. आगे प्रभुदयाल कथक्के नोकर राषि सम्वत् १८८९ साल मार्ग-
३. वदि १ रोज[३] देषि दर्माहा मैन्हावारि रुपैया २५ गरिबक्स्यौं आ-
४. फ्ना षातिरजामासग ढोकामा हाजिर रुजु रहि भोग्य गर.
५. ईति सम्वत् १८८९ साल मिति माघसुदि ११ रोज ५[४] शुभम् — — —

मार्फत् भीमसेन थापा
मार्फत् उमाकान्त उपाध्या

(३२ नं. को पोका)

---

३. वि. सं. १८८९ मार्गकृष्ण (पूर्णान्तमानले)

	गते	वार	तिथि	घडी	पला
कार्तिक	२६	शुक्र	प्रतिपद्	१६ ।	१७

(पात्रोबाट)

४. वि. सं. १९८९ माघशुक्ल

	गते	वार	तिथि	घडी	पला
माघ	२०	बृहस्पति	दशमी	९ ।	५०

(पात्रोबाट)

बृहस्पतिवार दशमी ९ घडी ५० पलाउप्रान्त एकादशीमा यो पत्र लेखिएको देखिन्छ ।

(३ सङ्ख्या)

श्रीदुर्गाज्यू १

१. स्वस्ति श्रीमन्महाराजाधिराजकस्य रुक्का --------
२. आगे रहीम् बेग रफुगरके पसमिना गंन्ह साल रुमाल रफु गर्न र धु-
३. नाकन नोकर राषि मैंन्हा १ के दर्माहा अघिको रुपैया २० थप १० सा-
४. ल आषाडवदि १ देषि रुपैया १० ज्मा रुपैया ३० गरिबक्स्यौ षाति-
५. रज्मासंग टहलमा रुजु रहि दर्माहा ली भोग्य गर इति सम्वत् १८९०
६. साल मिति ज्येष्ठ शुदि १५ रोज १ शुभम्————

मार्फत् भीमसेन थापा
मार्फत् उमाकान्त उपाध्या

(१३ नं. को पोका)

(४ सङ्ख्या)

श्रीदुर्गाज्यू १

१. स्वस्ति श्रीमन्महाराजाधिराजकस्य रुक्का -----------
२. आगे मीर महमद वकाके नजिबुल्लाहको षाएल सम्वत् १८९०
३. साल मार्गवदि ७ रोजदेषि हाम्रा दर्बारको कार्चोपि काजका-
४. ममा नोकर राषि मैंन्हावारि दर्माहा रुपैया २५ गरिबक्स्यौं
५. आपना षातिरज्मासंग लायाअन्हायाको कार्चोपिकाममा
६. हाजीर रुजु रहि दर्माहा ली भोग्य गर इति सम्वत् १८९० साल
७. मिति मार्गसिरशुदि ९ रोज ६ शुभम्————

मार्फत् भीमसेन थापा

(१३ नं. को पोका)

(५ सङ्ख्या)

श्रीदुर्गाज्यू १

१. स्वस्ति श्रीमन्महाराजाधिराजकस्य रुक्का ---------
२. आगे धिर्जनरसिंके हाम्रा दर्बारमा भोटचा अक्षरको लेषपन्ह ग-

३. नौंलाई नोकर राषि दर्माहा अघिदेषिको रुपैंया १५ सम्वत् १८
४. ९० साल मार्गशुदि १ रोजदेषि थप रुपैंया ५ जमा मैन्हावारि रुपै-
५. या २० गरिबक्स्यौ आपना षातिज्मासित आठौ पहर टहल-
६. मा रुजु रहि दर्माहा र दसैं फागु सित कालाको जडावर र दसैं
७. संक्रांति श्राद्धषर्च लि भोग्य गर इति सम्वत् १८९० साल मि-
८. ति मार्गशिरवदि ९ रोज ६ शुभम्————

मार्फत् भीमसेन थापा
मार्फत् उमाकान्त उपाध्या

(१३ नं. को पोका)

(६ सङ्ख्या)

श्रीदुर्गाज्यू १

१. स्वस्ति श्रीमन्महाराजाधिराजकस्य रुक्का ------
२. आगे गवैया पंजाबि सरौदिके इस्तक् सम्वत् १८९० साल चैत्र-
३. वदि १ देषि नोकर राषि मैन्हावारि दर्माहा रुपैंया १२५ गरि-
४. बक्स्यौं आफना षातिरजामासंग सांझ सबेर ढोकामा हाजी-
५. र रुजु रहि दर्माहा ली भोग्य गर इति सम्वत् १८९० साल मिति
६. चैत्रवदि ११ रोज १ शुभम् ————

मार्फत् भीमसेन थापा
मार्फत् उमाकान्त उपाध्या

(१३ नं. को पोका)

०—०

हेमराज पण्डितज्यूलाई जूसेप्पे तुच्चिले पठाएका चार अप्रकाशित पत्र

–दिनेशराज पन्त

हेमराज पण्डितज्यूलाई जूसेप्पे तुच्चिले पठाएका यी चार पत्रका फोटोकपी हेमराजका नाति श्रीप्रकाश ए. राजको सौजन्यले प्राप्त भएका हुन् । १–३ सङ्ख्याका पत्र तुच्चिकै हस्ताक्षरमा छन्, ४ सङ्ख्याको पत्रचाहिँ टाइप गरिएको छ । यी पत्र यथावत् प्रकाश गरिएका छन् ।

(१ सङ्ख्या)

श्रीगुरुपादाः

भारतदेशे भ्रमणेन श्रीगुरुवरस्य सप्रेमपत्रस्योत्तररचनानन्दे विलम्बः संजातः । कार्यबाहुल्येन परिश्रान्तो हेमान्तस्य च वायुपरिणामेनाल्हादितो कल्‌कत्ता[1]नगरं परित्यज्य भार्यया सह काशीं गत्वा पुस्तकालयानि प्रचीनचिन्हानि च समालोच्य पण्डितवरान् समन्वेष्य नमस्कृत्य च राजपुत्राणां देशं जयपुरं आग्रां इन्द्रप्रस्थां च दृष्ट्वा बोधिवृक्षमभ्यर्च्य स्वगृहं पुनरागतोऽस्मि ।

श्रीगुरुवरस्य सहचारिणी सन्तानश्च सुष्ठु वर्तत इत्याशया पुष्ट इवायं जनः ।

यच्च गुरुवरेण सोमसिद्धान्तमवलम्ब्य लिखितं प्राप्तं मया । आगमप्रामाण्येऽपि श्रीयमुनाचार्येण विरचितेऽधिकं प्रमाणं प्राप्तम् । यच्चैवं संगृहीतं तत्सर्वं मुद्र्यतेऽधुना, यदा च मुद्रणं समाप्तं स्यात्, तदा प्रबन्धोऽयं श्रीगुरुवरस्य सकाशे प्रेषयिष्यते मया । एतस्मिन् च प्रबन्धे महासिद्धानवलम्ब्य विस्तररूपेण किञ्चिल्लिखितं वर्तते । किं गुरुवरेण नवीनं किमपि रत्नं प्राप्तम् ? "धर्मधर्मताविभङ्ग" इति प्रकीर्तितं पुस्तकं मैत्रेयनाथेन विराचितं यत्नेनैवान्वेषणीयम् । मैत्रेयनाथो हि योगाचारस्य मतस्य प्रणेता इति नात्र सन्देहो वर्तते ।

"अभिसमयालङ्कारालोकस्य" मुद्रणं मार्च्[2]मासे समाप्तं स्यात् । बौद्धयोगविशये तथाप्रयोजनीयं

१. यहाँ रोमनले कल्‌कत्ता लेखिएको छ ।

२. यहाँ रोमनले मार्च् लेखिएको छ ।

पुस्तकं न जाने, बौद्धपण्डितानां च तस्मात् महान्नेवोपकारो भविष्यति । आगामिनि मासे शेषभागे, दार्जिलिङ[3]प्रदेशं गमिष्यामि । ममेच्छा वर्तते ठिबेतप्रदेशं पुनर्द्रष्टुम् । तदर्थं च इङ्ग्रेजिशासनसकाशे प्रार्थना प्रेषिता । अद्यपर्यन्तं तु न जाने यद्यनुमतिर्दीयते न वा । अहमिच्छामि गुगे–प्रदेशं कैलास-पर्यन्तं सुष्ठु परीक्षितुं यतो "गुगे" इतिनामकप्रदेशस्य रज्ञा दीपंकरादयः सुप्रसिद्धा भारतीयाः पण्डिता आमन्त्रिताः । तस्मिन् च प्रदेशे अधुनापि प्रचीना विहारा वर्तन्ते यत्र शिलालेखा दृश्यन्ते । तासां च प्रतीकान्तरमवश्यकमेव । यदि च शिललेखाः प्राप्यन्ते, विहारेषु प्रचीनानि पुस्तकानि स्युरिति अनुमतिर्न्याय्या एव । किं त्वत्रेङ्ग्रजिराजकीयशासनं टिबेतशासनं च प्रमाणम् । यदि देवानां पसादेनानुमतिर्दीयते किञ्चिच्च प्राप्यते श्रीगुरुवरं विज्ञपयिष्यत्येष जनः ।

आगमानामन्वेषणमारब्धं मया । करणागमं चाधुना पठ्यते । मम सन्निधाने कायिकागममपि वर्तते । किं जानाति श्रीगुरुवरो यदि अन्यानि आगमानि कुत्रापि मुद्रितानि स्युः । यदि जानाति तेषां प्राप्तिस्थानलिखनादनुगृहीतो भवेयम् ।

अद्यैव नेपालदेशस्य महाराजाधिराजस्य सकाशे पत्रं प्रेषितं यस्मिन् निश्वासतत्त्वसंहितायाः प्रतीकान्तरं प्रार्थ्यते । किमपराणि आगमानि नेपालदेशे संरक्षितानि सन्ति यानि श्रीगुरुवरः प्रधानानि मन्यते ? ।

श्रीगुरुवर नेपालदेशेऽहमत्र तु जिवितं यापयामीति मम प्राक्तनदुष्कृतकर्मणा प्राप्तम् । न तु कोऽपि मम परिचितो यं प्रति स्नेहबन्धो मम हृदयस्य तथा दृढः स्यादयथा श्रीगुरुवरं प्रति । राजकीय-पुस्तकालये ये ये संवादा, तन्त्रसारस्य यद्यत् समालोचनं, प्रचीनपुस्तकानां प्राप्तेर्या या वर्णना तत् सर्वं कदापि विस्मृतुं न शक्नोमि । कदा तु कथं वावयोः पुनर्दर्शनं भवेत, तत्र देवा एव प्रमाणम् । किं बहुना । यच्छ्रीगुरुवरेण प्रार्थितं तत्सर्वं महादेवः सफलीकुर्यादित्यस्य जनस्याकाङ्क्षा ।

श्रीगुरुपादानामाशीर्वादम् प्रार्थयामि ।

श्रीगुरुवरस्य सुविनीतः
ज. तुच्चि

(२ सङ्ख्या)

श्रीगुरुपादाः,

श्रीगुरुपादानामिच्छानुसरेण "अभिसमयालाकस्य" प्रथमपत्रं प्रेष्यते मया । यानि पुस्तकानि भारतीयसाहित्यान्वेषणे प्रयोजनीयानि, पश्चिमदशे च मुद्रितानि सन्ति, तेषां, भवदभिप्रेतस्य सूचीपत्रस्य रचने व्यग्रोऽहम् । तच्च समाप्यागमिनि सप्तके गुरुपादानां समीपं प्रेषयिष्यामि । तेन च सार्धं "मध्यान्तविभाग" इति नामकं हस्तलिखितं पुस्तकमत्रभवते पुनः समर्पयिष्यामि ।

---

३. यहां रोमनले दार्जिलिङ लेखिएको छ ।

पुनश्च "विग्रहव्यावर्तनीति नामकग्रन्थस्य नागार्जुनेन लिखितस्य काश्चित्कारिका भवत्प्रदर्शनाय प्रेषिताः ।

उत्तरभागे टिबेटमूलं लिखितं, मध्यमे प्रतिपदमनुवादो दृश्यते, अधमे तु तासां कारिकाणां संस्कृतभाषायां पुनर्स्थापनं मया कृतम् । एवं प्रकारेण मध्यान्तविभागस्य कारिकाणामपि पुनर्स्थापनं सुकरं भविष्यतीति ममाशा । इति निवेदितम् ।

भवतः सुविनीतः
ज. तुच्चि

एतेन पत्रेन सह चीनाभिधानं यद्दर्शने भवदभिलाषोऽस्ति प्रेष्यते ।

(३ सङ्ख्या)

श्रीगुरुपादाः

श्रीगुरुपादानां प्रेमसम्पूर्णं पत्रं सामोदं प्राप्तं मया । किं तु तदर्थमवबुध्य विषदमापन्नोऽस्मि । यच्छुभं कल्याणं च तदेव श्रीगुरवे प्रार्थयामि । आशा तु वर्तते यद्देवानां प्रसादेनेदानीं श्रीगुरोर्माता भार्या पुत्रश्च स्वस्तीकृताः । तादृशसन्देशावाहकं श्रीगुरोः पत्रमुत्कंठिता प्रतीछामहे । आवयोरपि शरीरावस्था न समीचीना संजाता । ज्वरो निष्कासित एव, अपितु सदा कायकृशता दौर्बल्यञ्च । चिकित्सकैः विड्मुत्रयोः परीक्षां कृत्वा डिस्एन्टरइ[४] इति क्षुद्रजीविकाः (बसिल्आइ)[५] प्राप्ताः । तत्प्रतीकारार्थञ्चाधुना अटोभ्याक्सिन्[६] इति प्रकीर्तितं क्रियते ।

मध्यान्तविभागस्य संस्कृतभाषायां पुनः संस्थापनेऽतीव व्यापृतोऽस्मि । तद्धि पुस्तकं बौद्धशास्त्रदर्शनयोश्चान्वेषणेऽत्युपकारणीयं मन्ये ।

न ह्येतत्पर्यन्तं मैत्रेयस्य मतं सुष्ठु ज्ञातमभूत् । कैश्चिच्च पण्डितैरेतदपि लिखितं यत्स न कदाचित्कुत्रचिद्वाऽभवत् ततश्च माइथोलज्इकल् बीइङ[७] इति मन्तव्यः । अधुना मध्यान्तविभागानुसारेण अभिसमयालङ्कारकारिकाः, अभिसमयालंकारालोकश्चेति पुस्तकद्वयं यन्मया मुद्रचतेऽवलम्ब्य च तस्यास्तित्वे नास्तित्वे, वा विचारो न युज्यते । पुनश्च तत्पुस्तकत्रयमवलम्ब्य तस्य मतमपि स्पष्टमेवावगम्यते । तस्य नागार्जुनस्य च विश्वविद्यालये यस्याध्यक्षाणां निमन्त्रणमनुमितं मया । अनेन पत्रेण सह मम न्यायविषयस्य मुद्रचमाणस्य पुस्तकस्योपद्घातभागस्य कानिचित्पत्राणि प्रेषितानि । तत १२[८] पत्रे सौमसिद्धान्तमवलम्ब्य किञ्चिल्लिखितं मया । किं तु टिभेतपुस्तकेषु चिनपुस्तकेषु

४. यहाँ रोमनले डिस्एन्टरइ लेखिएको छ ।
५. यहाँ रोमनले बसिल्आइ लेखिएको छ ।
६. यहाँ रोमनले अटोभ्याक्सिन् लेखिएको छ ।
७. यहाँ रोमनले माइथोलज्इकअल् बीइङ लेखिएको छ ।
८. यहाँ रोमन अङ्कले १२ लेखिएको छ ।

च बहुधान्वेष्य तस्मिन्नेव विषयेऽपरं प्रमाणं प्राप्तं मया । एषा च प्रार्थना क्रियते मया । किं श्रीगुरुवरस्य किमपि तन्त्रमागमं वा परिचितमस्ति यस्य "नय" अथवा "सोम, सौम" इति नामधेयं वर्तते । यदि तत्प्राप्येत तदा "असङ्गसमये तन्त्राणि प्रचलितानि" इति मतं प्रामाणिकं स्यात् । एवं च यद्यूरोपीयैः मतभेदो विवादश्चाभूत् । उभयोर्मते हि प्रज्ञापारमितासूत्राणि प्रामाणिकं मूलपुस्तकं किं तु शून्यतापरीक्षायां विवादः । नागार्जुनस्य मते शून्यता सर्वविकल्पातिक्रान्ता न सत्यसती वा वक्तुं शक्यते । मैत्रेयेण तु शून्यता विद्यत एव इति स्वीकृतम् । तस्मादेकेन मध्यममतं पक्षीकृतम् । अपरेण तु मध्यान्त इति. तृतीयं च पुस्तकं मैत्रेयेण लिखितं धर्मधर्मताविभङ्ग इति नामधेयम् । तस्य च टिभेतानुवादः पठ्यत इदानीं मया । यदि नेपालदेशे मूलपुस्तकं प्राप्येत, महानुपकारः स्यात् ।

मैत्रेयनाथमवलम्ब्य फेब्रुअरि[९]मासे प्रबन्धषट्कं मया श्रावयिष्यते कल्कत्ता[१०]पण्डितैर्जल्प्यते तन्त्राणां सप्तमशताब्दात्पश्चात् प्रादुर्भाव इति, उन्मूलितमेव स्यात् । एतस्मिन् विषये किं श्रीगुरुवरेण स्वीक्रियते इति ज्ञातुमतीव समुत्सुकऽहम् । अपरा च प्रार्थना क्रियते । प्रतीत्यसमुत्पादपुस्तकस्य, द्वितीये पत्रे, (यस्यारम्भ एवं पठ्यते "रोपरये तु सुखबुद्धिर्भवति....") पृष्ठभागे प्रथमपङ्क्तौ किं लिखितं ? मम प्रतिलीपौ तदेव वर्तते "घ्राणरसं वा श्रोत्रे वा" न तु तत्समीचीनमिति मन्ये टिभेतानुवादेन सह च विसंवादो वर्तते । तथापि चतुर्थे पत्रे (यस्यारम्भ : : "कक्षभित्तवो भवतृष्णाया आहार : इति), पृष्ठभागे श्लोको दृश्यते । अत्रापि संशयो वर्तते । ते कामा न समृद्धचन्ति शल्यबाद्धचेव शल्यतः तदपसङ्कितं शीलं च । किमेषः सम्यक्पाठो न वा ?

अभिसमालङ्कारालोकस्य मुद्रणं फेब्रुअरि[११] अथवा मार्च्[१२]मासे समाप्येत । यदा च समाप्तं स्यात् हस्तलिखितं पुस्तकं यन्महाराजस्यानुग्रहेण समानीतं मया पुनः समर्प्येत । योगचार-मतस्यान्वेषणे तथाप्रयोजनीयं पुस्तकमपरं न विद्यते । राजकीयपुस्तकालयस्य च पुस्तकमतीव शुद्धम् । एवं च सम्यक् मुद्रणं सम्पादयितुमाशामहे ।

किं तु मम पत्रमतिविस्तीर्णं संजातम् । प्राचुर्यभयादलं विस्तरेण ।

यदि श्रीगुरुवरोऽवकाशं प्राप्य मम पत्रम् प्रेषयिष्यति, तदाहं कृतार्थः स्यामिति निश्चितमेव । देशदूरतया, कालपरिणामेन च श्रीगुरुवरः सदैव मम मनसि स्थितः । किमन्येन । श्रीगुरुवरस्याशीर्वाद-माकांक्षी

श्रीगुरुपादानां सुविनीतः

ज. तुच्चि

---

९. यहाँ रोमनले फेब्रुअरि लेखिएको छ ।

१०. यहाँ रोमनले कल्कत्ता लेखिएको छ ।

११. यहाँ रोमनले फेब्रुअरि लेखिएको छ ।

१२. यहाँ रोमनले मार्च् लेखिएको छ ।

(४ सङ्ख्या)

इस्तित्युतो इतालिआनो
पेर् इल्
मेदिओ एद् इस्त्रेमो ओरियन्ते[13]
एन्ते कोन् पेर्सोनालिता जुरिडिका डी डिरितो पुब्लिको[14] रोमा
डी. २ युलिओ १९४७ एन्. १०७७[15] भिया मेरुलाना, २४८ पालाज्जो ब्रान्काचिओल्
प्रोट्. एन्.[17] टेलेफ् ४४६३१[16]
१०.११.१९५३

ओजेत्तो[18] रोकपत्तनाद्

स्वस्ति, श्रीमतसंस्कृतार्द्यनेकविद्याविनयविरजमानाः श्रीयुक्तहेमराजशर्मनामधारिणः साष्टाङ्गप्रणमपुरःसरं विज्ञाप्यन्ते.

यदा नेपालप्रदेशं प्रथमवारमागच्छम्, तदा गुरुवस्य पुस्तकालयमहारत्ने संरक्षिताया भदन्त-विमुक्तिसेनविरचिताया अभिसमयालंकारव्याख्यायाः प्रतिलिपिः कृता. तदेव पुस्तकमिदानीं मया मुद्र्यते अस्माकं प्रदेशे.

किं तु कदाचिन्मूलपुस्तकस्य त्रुटितावस्थया लिपिकारस्य वा स्खलितैर्न सर्वदा सर्वथा न तिब्बतीयानुवादेन सह तुलनमपि कृत्वा शुद्धिः शक्यते कर्तुम्. इति मत्वा पुनरपि मूलपुस्तकस्याव-लोकनमवश्यकमेवेति अनुमीयते. तस्माद् यदि गुरुवरः प्रसादं कृत्वा मूलपुस्तकस्य चित्रमुद्राहयिष्यति मेजरकैषरबहादूरद्वारेण च मां प्रेषयिष्यति, अतीवानुगृहीतो भवेदयं पुरुषः इति निवेदनम्.

भवदीयस्य,

(जूसेप्पे तूच्चि)[19]

(छेउमा)

इन्डिरिजो टेलिग्राफिको : इस्मेयो रोमा[20]

०—०

१३. यहाँ रोमनले इस्तित्युतो इतालिआनो पेर् इल् मेदिओ एद् इस्त्रेमो ओरियन्ते लेखिएको छ ।
१४. यहाँ रोमनले एन्ते कोन् पेर्सोनालिता जुरिडिका डी डिरित्तो पुब्लिको लेखिएको छ ।
१५. यहाँ रोमनले डी. २ युलिओ १९४७ एन्. १०७७ लेखिएको छ ।
१६. यहाँ रोमनले रोमा भिया मेरुलाना, २४८ पालाज्जो ब्रान्काचिओल् टेलेफ् ४४६३१ लेखिएको छ ।
१७. यहाँ रोमनले प्रोट्. एन्. लेखिएको छ ।
१८. यहाँ रोमनले ओजेत्तो लेखिएको छ ।
१९. यहाँ रोमनले तूच्चिले सही गरेका छन्, देवनागरीमा जूसेप्पे तूच्चि पनि टाइप गरिएको छ ।
२०. यहाँ रोमनले इन्डिरिजो टेलिग्राफिको: इस्मेयो रोमा लेखिएको छ ।

पूर्णिमा (इतिहास–प्रधान त्रैमासिक पत्रिका) का. मे. प्र. द. नं. १५५/२४६

कार्यालय

संशोधन–मण्डल

वटु सवलबहाल

ग–१–५३०

काठमाडौं ३

नेपाल

फोन नं. २–२०४९२

वि. सं. २०४८ आश्विन

यस अङ्कको मूल्य रु. ३०।–

मुद्रक

लुम्बिनी प्रेस

नयाँ बानेश्वर

ख — १/३७३ काठमाडौं–१

नेपाल

फोन नं. ४–७३५८६